UNIVERSITY OF TRAVANCORE.

TRIVANDRUM SANSKRIT SERIES
No. CXLV.

Śrī Citrodayamañjarī
No. XXXIV.

UNIVERSITY SERIES No. III.

KUVALAYĀVALĪ

OR

RATNAPĀÑCĀLIKĀ

BY

ŚINGABHŪPĀLA.

EDITED BY

Vaidyaśāstranipuṇaḥ, L. A. Ravi Varmā,
Honorary Director, The Oriental Manuscripts Library of The University of Travancore.

TRIVANDRUM:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1941.

 [Price Rs. 1-8-0.

UNIVERSITY OF TRAVANCORE.

TRIVANDRUM SANSKRIT SERIES

No. CXLV.

Śrī Citrodayamañjarī

No. XXXIV.

UNIVERSITY SERIES No. III.

KUVALAYĀVALĪ

OR

RATNAPĀÑCĀLIKĀ

BY

ŚINGABHŪPĀLA.

EDITED BY

Vaidyaśāstranipuṇaḥ, L. A. Ravi Varmā,

Honorary Director, The Oriental Manuscripts Library of The University of Travancore.

TRIVANDRUM:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,

1941.

 [Price Rs. 1-8-0.



HER HIGHNESS SETU PARVATI BAYI D. Litt.
MAHARANI OF TRAVANCORE

DEDICATED

BY

GRACIOUS PERMISSION

TO

HER HIGHNESS

MAHARANI SETU PARVATI BAYI

OF

TRAVANCORE

D. Litt.

PRO-CHANCELLOR

OF

THE UNIVERSITY OF TRAVANCORE

INTRODUCTION.

Kuvalayāvalī, also known as Ratnapāñcālikā, is a dramatic composition of the Nāṭikā type, in four Acts, by Śiṅgabhūpāla of Recallavaṁśa, the author of Rasārṇavasudhākara, a work on dramaturgy and poetics (T. S. Series No. 50). In his introduction to that book, Mahāmahopādhyāya Dr. Gaṇapati Śāstrī, on the authority of the late Professor Śeṣagiri Śāstrī of the Presidency College, equates Śiṅgabhūpa with Śiṅgamanāyaka and fixes his date as 1330 A. C. From the words "यथा ममैव, उत्फुल्लगण्डयुगम् , इत्यादौ" occurring on page 65 of Rasārṇavasudhākara, it is certain that the author of that work and of Kuvalayāvalī is the same, as we find that śloka in Kuvalayāvalī (Act iii. 4). In this drama, the phrase "श्लाघायै यस्य सश्रद्धा विश्वेश्वरसरस्वती" (Act. i. 3) shows that a well-known scholar Viśveśvara held Śiṅgabhūpa's works in high esteem. This Viśveśvara is the author of Camatkāracandrikā, as we find mention of Śiṅgabhūpa in the colophon of that work :—

"इति सरससाहित्यचातुरीधुरीणश्रीविश्वेश्वरकविचन्द्रप्रणीतायां श्रीसिंहभूपालकीर्तिसुधासारशीतलायां चमत्कारचन्द्रिकायां वर्णविवेको नाम प्रथमो विलासः ।"

In the same work are also noted references to Rasārṇavasudhākara, such as :

"सिंहभूपालरचिते रसार्णवसुधाकरे ।
अस्य प्रपञ्चो विज्ञेयः... ...... ॥"

Dr. N. Veṅkaṭaramaṇayya in his introduction of Velugoṭivārivaṁśāvali mentions that Śiṅga II (Sarvajña) as the author of Rasārṇavasudhākara. He also fixes the date of Śiṅga II's father Anapota as about 1370 A. C. Accordingly, the period of poet Śiṅgabhūpa may be placed about the second half of the 14th century. According to Dr. Veṅkaṭaramaṇayya, the Śiṅgabhūpa mentioned by Bommakaṇṭha Appalā(yā)cārya is Śiṅga III, who ascended the throne in 1425 A. D.

In Rasārṇavasudhākara a good genealogy is given which tallies well with the genealogy elaborated by Dr. Veṅkataramaṇayya except in one small particular, *viz.*, that Śiṅga II is the younger son of Anapota, the elder being one Devagirīśvara who perhaps died early, as may be inferred from the words of Rasārṇavasudhākara :—

तयोरभूतां पुत्रौ द्वावाद्यो देवगिरीश्वरः ।
द्वितीयस्त्वद्वितीयोऽसौ यशसा शिङ्गभूपतिः ॥ (I. 26)
अथ श्रीशिङ्गभूपालो दीर्घायुर्वसुधामिमाम् । (I. 27)

Being the direct words of the author and in respect of himself, this may be accepted as the true genealogy. The historical fact that Yerra Dāca Nāiḍu (4) engaged himself in Pāṇḍyan wars successfully and the special mention against Dācanāyaka in Rasārṇavasudhākara as "पाण्ड्यराजगजानीकाङ्कमयलक्ष्मीरुपागता" make it certain that our author begins his genealogy from the 4th generation. The author in Rasārṇavasudhākara mentions that Recallavaṃśa comes of the fourth Varṇa:

"अस्ति किञ्चित् परं वस्तु परमानन्दकन्दलम् ।
कमलाकुचकाठिन्यकुतूहलि भुजान्तरम् ॥
तस्य पादाम्बुजाज्जातो वर्णो विगतकल्मषः ।" (Rasār. I. 3 and 4)

He ruled over a vast extent of territory between the Vindhya mountains and Śrīśaila in the Kurnool District. The Rajas of Veṅkaṭagiri trace their descent from Vetaḷa Nāiḍu, the founder of that dynasty.

The work.

The present work appears to be an earlier production than Rasārṇavasudhākara since two at least of the ślokas (Act. ii.-15 and Act. iii. 4) are found quoted in that work. That the author had a high opinion of this drama is evident from the words "अखण्डपरमानन्दवस्तुचमत्कारिणीं कुवलयावलीं नाम नाटिकां..........' of Sutradhāra as well as from the colophon :

"पूर्णेयं शिङ्गभूपेन कथिता मधुजल्पितैः ।
रत्नपाञ्चालिका नाम नाटिका रसपेटिका ॥"

This edition is prepared from two manuscripts, Nos. 2033 and 2399, belonging to the old Curator's library. Both are in Grantha script; 2399 is complete while the beginning and end leaves are badly damaged in 2033. Both the manuscripts hail from South Travancore, 2033 from Anantakṛṣṇa-Śāstrī, son of Bhagavatisubrahmaṇya Śāstrī of Āśrāmam near Śucīndram and the other from Sthāṇusubrahmaṇya Śāstrī of Cape Comorin. Both are almost alike and differences in readings are few and inconsequential.

Story and plot.

Though some of the *dramatis personae*, such as Kṛṣṇa, Nārada and Rukmiṇī are puranic and the story as a whole is given a puranic touch, it has no such basis and is imaginary. The drama is given two distinct names, Kuvalayāvalī and Ratnapāñcālikā, by the author himself as is evidenced from Sūtradhāra's words and the colophon already cited. The story is this. At the instance of Brahma, Bhūmi assumes the form of a maiden whom Nārada in the guise of a foster-father leaves under the protection of Rukmiṇī as a Nyāsa, pretending that he is going about in search of a suitable groom for the girl. Nārada has given his foster-daughter a charm in the form of a ring which, when she wears, would make her appear to males as a statuette in precious stones instead of as a normal human maiden. This charm is meant to protect her from possible unwanted attentions of males. The name Ratnapāñcālikā arises out of this peculiarity of appearing as a doll (Ratnapāñcālikā a statuette or doll in precious stones). While under Rukmiṇī's care, Kuvalayāvalī, in the company of her friend Candralēkhā, one day happens to go to the palace gardens where she chances to meet Kṛṣṇa who was enjoying a pleasant evening after his return from a campaign against Kālayavana. Kṛṣṇa first takes the girl for a wonderful statuette and fails to understand why Candralēkhā keeps talking to a doll as if mad. Then he begins to suspect. In the course of her playful acts and unknown to her, the charm

ring chances to fall off from Kuvalayāvalī's fingers which exposes her true nature to Kṛṣṇa and a mutual love ensues. By this time, on a summons, Candralekhā and Kuvalayāvalī go away leaving Kṛṣṇa alone in the gardens. While Kṛṣṇa is idling there thinking of the charming girl who had just then left the place, he finds the lost ring of Kuvalayāvalī; and the legend engraved on it enlightens him of the properties and purpose of that ring. By this time Kuvalayāvalī becomes aware of the loss of her ring and hastens back to the garden in search of it. Kṛṣṇa now restores the ring to her. These two chance-encounters pave the way for more secret love-meetings. Satyabhāmā chances to come upon one such love-meeting and on her information Rukmiṇī causes Kuvalayāvalī to be kept in concealment in one of her own Prāsādas. A Dānava getting scent of this, forcibly abducts Kuvalayāvalī which urges Rukmiṇī to seek the help of Kṛṣṇa to get her back. Kṛṣṇa undertakes the mission and goes to fight the Dānava. During the absence of Kṛṣṇa, Nārada returns and in his conversation informs Rukmiṇī about the real story of Kuvalayāvalī. When Kṛṣṇa returns after defeating the Dānava, Rukmiṇī with the consent of Nārada and others gives away Kuvalayāvalī as a present to Kṛṣṇa for his acceptance as wife.

Diction and plot.

The leading Rasa is Śṛṅgāra, the Vipralambha type dominating. Most of the Rasas are represented and Śrīvatsa makes a good court-fool. The make-up of the plot, the nyāsa of a maiden and its subsequent developments strongly remind one of Svapnavāsavadatta. In literary merit, and particularly in the meticulous adherence to the rules of poetics and Alaṅkāra, the work is of a very high order. In many places one meets with passages having striking resemblances to passages in the Sākuntala of Kālidāsa. Kṛṣṇa's apostrophe to the ring of Kuvalayāvalī,

"तिरयसि यन्मधुरगिरो लावण्यं मदनराज्यमुद्रायाः ।
दुरितेन तेन मुद्रे स्वपदपरिभ्रंशमुपगता भवती ॥" (Act ii. śl. 1)

bears close kinship to Duṣyanta's in Śākuntala "कथं नु तं बन्धुरकोमलाङ्गुलिं ...." and some resemblance to "श्रुतिसुखनिनदे कथं नु देव्या: ...." in Svapnavāsavadatta (vi. śl. 1.) There is much resemblance both in the situation created, and in sentiments, in the Śṛṅgārasallāpa of Sakuntalā (Act iii) and of Kuvalayāvalī (Act iii). The portions in Śākuntala

"(शकुन्तलाभ्युत्थातुमिच्छति)
सन्दष्टकुसुमशयनान्याशु क्लान्तबिसभङ्गसुरभीणि ।
गुरुपरितापानि न ते गात्राण्युपचारमर्हन्ति ॥

....

अलमलमावेगेन नन्वयमाराधयिता जनस्तव समीपे वर्तते । ....

(बलादेनां निवर्तयति)

शाकुन्तला— पौरव, रक्ख अविणअं ।" (Bombay Edition)

....

....

"कुवलयावली— (सम्भ्रमावसाच्छयनमुत्थातुं प्रयतते)

नायकः— (बलादेनां निवारयन्)

ननु वयमिदानीमुपचरणीयाः; किन्त्वस्माभिरेव,

अभिनवबिसकाण्डपेलवं तदनु पयोधरभारभङ्गुरम् ।
तदुपरि परितापनिस्सहं परिचरणीयमिदं तवाङ्गकम् ।

कुवलयावली— भो मुञ्च अविणअं रक्खेहि । ....'

and of Kuvalayāvalī exhibit a close cousinship. In Act ii, the Nāyaka's description to his court-fool of Kuvalayāvalī's mental attitude towards him "अभिलाषो बालाक्ष्या: प्रदीप इव यवनिकाप्रकाशाभ्याम् । मन्दाक्षमन्मथाभ्यां न च प्रतीतो नचाप्रतीतश्च" closely resembles its counterpart in Śākuntala 'विनयवारितवृत्तिरतस्तया न विवृतो मदनो न च संवृतः" A number of such resemblances are encountered.

Evidence of scholarship. That the author himself appreciated the high degree of scholarship exhibited in this drama is evident from the Dhvani contained in his own words:

अपूर्वसंविधानेन तरङ्गितचमत्कृते: ।
पारितोषिकदानेऽहमधमर्णो भवामि ते ॥

(Act i. 11.) and

"रम्या वागिव सुप्रसादमधुरा देवीमणी रुक्मिणी
सन्तानार्थं इवात्युदारगरिमा स त्वं परिद्योतसे ।
कन्येयं करवल्लरीव विलसत्यन्योन्यमैत्रीक्रमो
युष्माकं भुवि मादृशान् सहृदयानानन्दयन्नेधताम् ॥"

(Act. iv. 22)

contained in this drama itself. Besides this it is found that a stanza from this drama:

"उत्फुल्लगण्डयुगमुन्नतमन्दहास-
मुद्रेकरागमुररीकृतकामतन्त्रम् ।
हस्तेन हस्तमवलम्ब्य कदा नु सेवे
सल्लापरूपममृतं सरसीरुहाक्ष्याः ॥"

(Act. iii. 4).

is quoted by the author himself in his work on dramaturgy and Rasa to exemplify not less than 9 factors :— 1. Mahāprāṇavarṇālpatvam, 2. Śleṣa, 3. Prasāda, 4. Miśrabandhasamatā, 5. Mādhurya, 6. Sukumaratā, 7. Arthavyakti, 8. Udāratvam and 9. Ojas. This clearly shows the amount of scholarship exhibited in this work. A high degree of scholarship in the field of grammar is also evident from this drama:

"उत्फुल्लगण्डमण्डलमुल्लसितदृगन्तसूचिताकूतम् ।
नमयन्त्यापि मुखाम्बुजमुन्नमितानङ्गसाम्राज्यम् ॥"

(Act ii. 15).

In this the first verb उन्नमिता (ण्यन्तात् कर्मणि लुट्) appears to be a luṭ in place of what ought to be a lṛṭ. This bold use is perhaps the result of a corollary deducible from the Bhāṣya "लुङ्लृट्लोर्लिङ्लुटावपवादौ भवतः". So also the form "गमितुम्" (ण्यन्तात् तुमुन्) in

"गन्तुं पदादपि पदं गमितुं न चाऽक्षम्"

(Act iii. 1).

Such usages are very uncommon if not unknown, and can be justified only with great difficulty. None but those for whom grammar is a servant and not master, will have the boldness to use such forms.

On the whole, this drama appears to be one which can be included among the high class dramatic compositions in Sanskrit; fine in conception, chaste in language and diction and very rich in Rasa characteristics. And above all it appears to possess that composite quality which will enable the composition to be staged provided cultured actors, who can realise and bring out the Rasas in full, are available.

Notwithstanding every care bestowed, a few typographical errors have crept in necessitating a small erratum slip and we crave the indulgence of readers in this matter.

Oriental Manuscripts Library,
University of Travancore,
Trivandrum,
21st April 1941.

L. A. RAVI VARMA,

Honorary Director.

Genealogy according to Rasārṇavasudhākara

- Dācaya Nāyaka of Recalla Vamśa.
  (He defeated the Pāṇḍyas and had biruda name Khaḍganārāyaṇa.)
  Married Vocamāmbā of Tāmarasavamśa
  - Śiṅgaprabhu
    - Ananta (Anapota) (*m* = Annamāmbā)
      - Devagirīśvara
      - SIṄGABHŪPATI
        - Annapota
        - Dācaya
        - Vallabharāya
        - Vēdagiriswāmi
        - (2 names not clear)
    - Mādhava
      - Vēdagiri & others
  - Vennama Nāyaka
  - Recamahīpati
    - Nāgaya Nāyaka

Genealogy according to Dr. Veṅkaṭaramaṇayya

- Yerra Dāca Nāiḍu (4)
  - Siṅgama Nāiḍu
    - Anapōta Nāiḍu
      - PEDA SIṄGAMA NĀIḌU (Sarvajñasiṅgama)
        - Anapōta Nāiḍu
        - Dāca Nāiḍu
        - Vallabha Nāiḍu
        - Vēdagiri Nāiḍu
        - Dāma Nāiḍu
        - Māda Nāiḍu
      - Dharma Nāiḍu
        - Timma Nāiḍu
    - Māda Nāiḍu
      - Peda Vēdagiri Nāiḍu
  - Vonnama Nāiḍu
  - Yācama Nāiḍu
    - Nāga Nāiḍu

श्लोकानुक्रमणी ।

शुद्धिपत्रिका ।

पृष्ठम.	पङ्क्तिः.	अशुद्धम्.	शुद्धम्.
१५	१५	भर्त्रा विसर्जिता	भर्त्रा विसर्जिता
,,	१७	स्तब्धचरणविनतोमुखं	मम चरणविनतोमुखं
२३	२०	वेत्यकुलास्मि	वेत्याकुलास्मि
७०	५	कुवलयदृशा	कुवलय(सु)दृशा

॥ श्रीः ॥

श्रीशिङ्गभूपालविरचिता

कुवलयावली ।

---

[1]शृङ्गारवीरसौहार्दं मौग्ध्यवैयात्यसौहृदम् ।
लास्यताण्डवसौजन्यं दाम्पत्यं तद् भजामहे ॥ १ ॥

अपि च,

बीजावापमुपेयिवान् स्मृतिवशाद् रागोष्मणोद्भेदवा-
नन्योन्यस्य कराङ्गुलीघटनया प्राप्तप्रवालोद्गमः ।
विस्रम्भेण विकासवान् सफलतामैक्येन सम्भावयन्
कल्याणं भवतां करोतु शिवयोरानन्दकल्पद्रुमः ॥ २ ॥

[नान्द्यन्ते]

सूत्रधारः — अद्याहं सकलसौभाग्यभासुरभवनाममरावतीविभवविलासरेखामणिमुकुरायमाणां धरणीदेवतानवरतसन्तन्यमानसप्ततन्तुसन्तानधूमरेखाच्छलविलिख्यमानगगनलक्ष्मीगण्डमण्डलाभोगमृगमदपत्रभङ्गाम् अभङ्गविहरमाणवीरभटकनककेयूरकोटीसङ्घट्टसञ्जातजातरूपरजःपुञ्जपिञ्जरितराजरथ्याङ्गणाम् अनङ्गपुनरुज्जीवनप्रसङ्गमङ्गलायतनारम्भविरचितनवकुवलयतोरणश्रीविडम्बितरलतरापाङ्गवारविलासिनीजनविराजमानां राजशैलाभिधानां राजधानीम्

1. 'शृङ्गारवीरसौहार्दमौग्ध्यवैयात्यसौहृदम् ।' ख. पाठः.

G. P. T. 530. 500. 17-4-1116.

अधिवसतः प्रसन्नगोमलदेवस्य वसन्तयात्रामहोत्सवे समुत्सुकचेतसा सकलदिगन्तसमागतेन नागरिकराजसभाजनेन सभाजनपुरस्सरमिदमादिष्टोऽस्मि—'अये रङ्गलक्ष्मीनिवास! ललितकविताविलासचतुराननेन चतुरुदधिवलयवेल्लितवसुन्धरापरिणाहपरिगलत्कीर्तिकर्पूरपूरापहासितान्यराजन्यगुणगौरवेण प्रतिगण्डभैरवेण भरितलक्ष्मीसरस्वतीपरस्परविरोधपरिवादपरिहरणप्रवीणनिजगुणतरङ्गितान्तरङ्गविद्वज्जनसभाजनपरायणेन खड्गनारायणेन मान्यमहिलागुणविशेषलीलासदनोमाम्बिकाविडूरविश्वम्भराविमलरत्नकन्दलेन श्रीमता श्रीशिङ्गभूपालेन प्रणीतामखण्डपरमानन्दवस्तुचमत्कारिणीं कुवलयावलीं नाम नाटिकां प्रयोगतो दर्शये'ति ।

[सानुसन्धानगौरवम्]

अहो साहित्यसौभाग्यं श्रीशिङ्गधरणीपतेः ।
श्लाघायै यस्य सन्नद्धा विश्वेश्वरसरस्वती ॥ ३ ॥

[सहर्षम्]

नेता मन्मथकारणं यदुपतिः *श्रीयन्नमातात्मजो
नाट्यालङ्कृतिनिर्मितौ परिणतः श्रीशिङ्गभूपः कविः ।
एषा पण्डितमण्डली रसकलासाम्राज्यसञ्जीवनी
पुण्येनाद्य पुराकृतेन फलितो मे नाट्यविद्याश्रमः ॥ ४ ॥

[नेपथ्याभिमुखमवलोक्य]

आर्ये! किमिदानीमपि विलम्बसे ।

---

* देश्यमिदं प्रतिभाति.

[प्रविश्य]

नटी — [सविनयम्] (क) अय्यउत्त ! सज्जीकिआ णेपच्छसामग्गी । ता दाणिं [1]अत्त उत्तरकरणिज्जं आणवेहि ।

सूत्रधारः —

रुक्मिणीसत्यभामादिसमेतपुरुषोत्तमाम् ।
उत्कण्ठते सभा द्रष्टुं सेयं कुवलयावलीम् ॥ ५ ॥

तदनुसन्धीयतां भूमिकापरिग्रहः ।

नटी — (ख) अय्यउत्त ! तुह चित्ताणुसरणं विणा मह किं अण्णं अत्थि ।

सूत्रधारः — साधु कल्याणशीले ! साधु

व्रतानि वर्णनीयानि सन्त्वन्यानि सहस्रशः ।
परं व्रतं पुरन्ध्रीणां पतिचित्तानुरञ्जनम् ॥ ६ ॥

[नेपथ्ये]

(ग) हळा ! सुदं एदं इत्थिआपुरुसत्थसारं वअणम् ।

क. आर्यपुत्र ! सज्जीकृता नेपथ्यसामग्री । तदिदानीमत्रोत्तरकरणीयमाज्ञापय ।

ख. आर्यपुत्र ! तव चित्तानुसरणं विना मम किमन्यदस्ति ।

ग. हला ! श्रुतमिदं स्त्रीपुरुषार्थसारं वचनम् ।

---

१. 'अय्यउत्त करणिज्जं' क. पाठः.

सूत्रधारः— [सहर्षम्] अये अयं कालयवनविजयाय प्रयाते वासुदेवे तदभ्युदयकाङ्क्षी विलासोद्याने सौभाग्यलक्ष्मीचिरण्टिकाप्रसाधनाय मिश्रितो रुक्मिणीप्रमुखदेवीपरिजनो महानित एवाभिवर्तते । तदेहि दूरमपसरावः ।

[इति निष्क्रान्तौ]

आमुखम् ।

[ततः प्रविशति देवीजनो विभवतश्च परिजनः]

रुक्मिणी—(क) हळा! तुह्मेहिं सुदं इत्थिआपुरुसत्थसारं वअणम् ।

इतराः—(ख) महादेवि! सुदं विदिअं पुणो पुणो सोदव्वं ।

रुक्मिणी—[सस्मरणहर्षम्] (ग) हळा! एदं (वि?) णारअमहेसिणा वि ळ(च्छ? च्छीए) उवदिट्ठं ।

जाम्बवती—(घ) महाभाए! तारिसं दारिअं (अं)तेउरण्णासं कदुअ वरं आहवप्पिओ अण्णेसिदुं गदो सो महेसी दाणिं णं पच्छागओ ।

क. हळा! युष्माभिः श्रुतं स्त्रीपुरुषार्थसारं वचनम् ।

ख. महादेवि! श्रुतं विदितं पुनः पुनः श्रोतव्यम् ।

ग. एतन्नारदमहर्षिणापि लक्ष्म्या उपदिष्टम् ।

घ. महाभागे! तादृशीं दारिकामन्तःपुरन्यासं कृत्वा वरम् आहवप्रियोऽन्वेषितुं गतः स महर्षिरिदानीं ननु प्रत्यागतः ।

रुक्मिणी — (क) अहइं ।

कालिन्दी—(ख) देवि! किं सा एसा दारिआ। जा इत्थिआदिट्ठीए इत्थिआ पडिहादि पुरुसदिट्ठीए वि रअण-पंचालिए त्ति सुणीअदि ।

रुक्मिणी—(ग) आम भइणीए! आम ।

सत्यभामा—[आत्मगतम्] (घ) अहो उप्पिंजलिअसहावा रुक्मिणी किं वि ण आणादि । अय्यउत्तस्स चित्तरञ्जणेक्कसीळो कपडणाडआणिव्वहणत्थुदिवादो खु सो सुरेसी। तेण कम्पइ विअ मे अप्पा ।

मित्रविन्दा—(ङ) देवि! अय्यउत्तस्स वुत्तंतो ण को वि उवळद्धो तस्स मुहादो । सो किळ कळहप्पिओ तिभुवणं परिब्भमइ ।

क. अथकिम् ।

ख. देवि! किं सैषा दारिका, या स्त्रीदृष्ट्या स्त्री प्रतिभाति पुरुषदृष्ट्यापि रत्नपाञ्चालिकेति श्रूयते ।

ग. आम भगिनिके! आम ।

घ. अहो उत्पिञ्जलितस्वभावा रुक्मिणी किमपि न जानाति । आर्यपुत्रस्य चित्तरञ्जनैकशीलः कपटनाटकनिर्वहणस्तुतिवादः खलु स सुरर्षिः । तेन कम्पत इव म आत्मा ।

ङ. देवि! आर्यपुत्रस्य वृत्तान्तो न कोऽप्युपलब्धस्तस्य मुखात् । स किल कलहप्रियस्त्रिभुवनं परिभ्रमति ।

रुक्मिणी---(क) हला! सुणुह सोहणं। अय्यउत्तेण वावादिदो किळ सो महासुरो।

इतराः---(ख) पिअं णो पिअं णो।

लक्ष्मणा---(ग) देवि! तत्थ एव विळम्बन्तो किति चिट्ठइ अय्यउत्तो।

रुक्मिणी---(घ) हळा! दिव्वआणेण णंदणं तं समागदाओ विहिवासवप्पमुहाओ देवदाओ सह जअवुत्तंतेण (त्ति) णो कहिदं।

सत्यभामा---(ङ) ता अज्ज पच्चूसम्मि अय्यउत्तो अह्माणं णअरं अळंकरिस्सदि।

रुक्मिणी---(च) तह एव्व।

[ततः प्रविशति दिव्येन रथेन नायको मातलिश्च।]

नायकः---आर्य! मातले! भगवतो महेन्द्रस्य सम्भावनया कृतार्थमात्मानं मन्ये।

क. हला! शृणुत शोभनम्। आर्यपुत्रेण व्यापादितः किल स महासुरः।

ख. प्रियं नः प्रियं नः।

ग. देवि! तत्रैव विलम्बमानः किमिति तिष्ठत्यार्यपुत्रः।

घ. हळा! दिव्ययानेन नन्दनं तत् समागता विधिवासवप्रमुखा देवताः सह जयवृत्तान्तेन (इति) नः कथितम्।

ङ. तदद्य प्रत्यूष आर्यपुत्रोऽस्माकं नगरमलङ्करिष्यति।

च. तथैव।

मातलिः— देव ! किमुच्यते, भवदनुग्रहादविचलितदिव्यसिंहासनः खलु भगवान् पाकशासनः ।

नायकः — नन्विदं विदर्भराजनन्दनाविलासोद्यानम् । तदत्रावतरितुमिच्छामि । [तथा कृत्वा] सूत ! सुखेन गम्यताम् ।

मातलिः— तथा । [इति सरथो निष्क्रान्तः ।]

सुशीला — (क) महाभाए ! कहिं दाणिं सा दारिआ ।

रुक्मिणी — (ख) हळा ! — अज्ज मए एव्व अणुमदा चन्दळेहाए समं उज्जाणसिरिं पेच्छिदुं गदा ।

सत्यभामा— [सप्रणयोपालम्भम्] (ग) हळा ! तुमं वि मुद्धसहावा खु, जं अपरिचिदेसु णिउंजप्पदेसेसु पराकिअं दारिअं संचारोसि ।

इतराः— (घ) एव्वं एव्व एदं ।

रुक्मिणी— [साङ्गीकारम्] (ङ) हळा ! आअच्छह । तं दारिअं आकारिऊण चिरंडिआपसाहणं करेम्ह ।

[इति सदेवीजना निष्क्रान्ता]

नायकः — [किञ्चिदुच्चैः] कात्र भोः केलीवनपालिकासु ।

क. महाभागे ! कुत्रेदानीं सा दारिका ।

ख. हला ! अद्य मयैवानुमता चन्द्रलेखया सममुद्यानश्रियं प्रेक्षितुं गता ।

ग. हला ! त्वमपि मुग्धस्वभावा खलु, यदपरिचितेषु निकुञ्जप्रदेशेषु परकीयां दारिकां सञ्चारयसि ।

घ. एवमेवैतत् ।

ङ. हला ! आगच्छत । तां दारिकामाकार्य चिरण्टिकाप्रसाधनं कुर्मः ।

[प्रविश्य]

वनपालिका — [सप्रणामम्] (क) आणवेदु देव्वो ।

नायकः — सहकारिके! किमिदानीमपि नापचितप्रसूनकिसलयं विलासोद्यानम् ।

वनपालिका— (ख) देव्वस्य विजअमंगळानुसंधाणकाळणादो देवीहिं एत्थ एव्व मिळिदाहिं चिरंटिआप्रसाहणं सहत्थावचिदमंजरीहिं कादव्वं त्ति ।

नायकः— हन्त! परमस्मासु कल्याणपरम्परानुसन्धानप्रयाससहिष्णुता देवीनाम् । तदहमतर्कितावलोकनप्रदानेन देवीनां प्रमोदविनयलज्जासम्भ्रमव्यतिकरदशामनुभवितुमिच्छामि । न तावदावेदयतु भवती मदागमनम् । कर्णे च विदितवृत्तान्तं विधाय तमितः श्रीवत्सं प्रेषय ।

सहकारिका— (ग) तह । [इति निष्क्रान्ता]

नायकः— [सौत्सुक्यम्]

मिलितानां सुजातानां स्वच्छानां मम मानसम् ।
रत्नानामिव देवीनां वृन्दमानन्दयिष्यति ॥ ७ ॥

[पुरो निरूप्य] अहो विलासोद्यानस्य रामणीयकविलासः । इह हि ।

क. आज्ञापयतु देवः ।

ख. देवस्य विजयमङ्गलानुसन्धानकारणाद् देवीभिरत्रैव मिलिताभिश्चिरण्टिकाप्रसाधनं स्वहस्तापचितमञ्जरीभिः कर्तव्यमिति ।

ग. तथा ।

अतिमधुरकण्ठनालैरभिनवसहकारकिसलयास्वादात् ।
कलकण्ठैस्तरुलतिकाः परस्परालापसुखमिवादधते ॥ ८ ॥

[निर्वर्ण्य] हन्त! नायं कोकिलालापः । किन्तु कयोरपि कन्यकयोः सल्लापः ।

[प्रविश्य]

चन्द्रलेखा— (क) हळा! इदो इदो ।

नायकः— [सविस्मयं] कथमियं विदग्धापि प्रमुग्धेव रत्नपाञ्चालिकामालपति चन्द्रलेखा ।

[प्रविश्य]

कुवलयावली— (ख) हळा! चंदळेहे ! अकित्तिमेण तुह सिणेहेण उल्ळसिदो मे अप्पा।

चन्द्रलेखा— (ग) हळा! सिळाहणिज्जो खु सहावसिद्धो कुवळयावळीचंदळेहाणं सिणेहाणुबन्धो ।

नायकः—

रत्नपाञ्चालिकैवेयमिति गृह्णामि चक्षुषा ।
लीलयाप्यनुमानेन नेति प्रत्येमि किन्त्विदम् ॥ ९ ॥

चन्द्रलेखा— [सखीं निर्वर्ण्य] (घ) हळा! तुमं अंतेउरं आणीदेण णारएण देवीणं सोभग्गगव्वो णिव्वासिदो त्ति तक्केमि ।

क. हला! इत इतः ।

ख. हला चन्द्रलेखे ! अकृत्रिमेण तव स्नेहेन उल्लसितो मे आत्मा ।

ग. हला! श्लाघनीयः खलु स्वभावसिद्धः कुवलयावलीचन्द्रलेखयोः स्नेहानुबन्धः ।

घ. हला! त्वामन्तःपुरमानीतेन नारदेन देवीनां सौभाग्यगर्वो निर्वासित इति तर्कयामि ।

कुवलयावली— [सप्रणयासूयम्] (क) हळा! कहं विअ। कहेहि सुणामि दाव णम्।

चन्द्रलेखा— (ख) अण्णहा कण्णआरअणं तुमं तिहुवणेक्कमल्लस्स खत्तिअकुमाळस्स भुअंतराळेक्कमंडणं कुणंदो माणिक्कं विअ मंजूसाए णारअमहेसी अंतेउरंमि ढक्केइ।

नायकः— हन्तेयं क्षत्रियाय प्रतिपादनीया। अन्यथा कथमस्मदन्तःपुरे स्थापयति भगवान् वैरिञ्चिः। [विचिन्त्य] कथं नु खल्विदं, यदियमस्मच्चक्षुषोः प्रतीयते रत्नपाञ्चालिकैवेति।

कुवलयावली— (ग) हळा! तुमं जं किं वि आळवेहि। (से?) अहं उण तुज्झ चउराळाविणीण अहिप्पाअं ण आणामि।

चन्द्रलेखा— (घ) हळा! णवजौव्वणस्स सहआरी भअवं वम्महो एव्व सव्वं जाणाविस्सदि।

क. हला! कथमिव। कथय शृणोमि तावदेनम्।

ख. अन्यथा कन्यकारत्नं त्वां त्रिभुवनैकमल्लस्य क्षत्रियकुमारस्य भुजान्तरालैकमण्डनं कुर्वन् माणिक्यमिव मञ्जूषायां नारदमहर्षिरन्तःपुरे स्थापयति।

ग. हला! त्वं यत् किमप्यालप। अहं पुनस्तव चतुरालापिन्या अभिप्रायं न जानामि।

घ. हला! नवयौवनस्य सहकारी भगवान् मन्मथ एव सर्वं ज्ञापयिष्यति।

नायकः—

सेयमलक्षितरूपा सखीसहालापसूचितौदार्या।
सौरभविदितविशेषा केतकलतिकेव हरति मे चेतः
[॥ १०॥

चन्द्रलेखा— (क) हळा! इदो पेच्छ मअणरज्जसंजीविणिं तुमं पेच्छितुं व ओइण्णस्स विळासुज्जाणमाहवस्स सिरिं।

कुवलयावली— (ख) [सलज्जाकौतुकम्] हळा! एतस्सि णिउंजे ओसरिदाओ रुक्मिणीवळ्ळहं विजयजेत्तादो पडिणिवुत्तं पेच्छामो अय्यउत्तम्।

चन्द्रलेखा— (ग) [आत्मगतम्] अंहो जह णामसरिसेण वंचिदा। होदु दाव। णं अणुसरिअ विणोएमि। [प्रकाशम्] जह पिअसहीए रोअदि।

[तथा कुरुतः]

कुवलयावली— [सौत्सुक्यमवलोक्य] (घ) हळा! कहिं सो महाणुभावो।

क. हला! इतः पश्य मदनराज्यसञ्जीविनीं त्वां प्रेक्षितुमिवावतीर्णस्य विलासोद्यानमाधवस्य श्रियम्।

ख. हला! एतस्मिन् निकुञ्जेऽपसृते रुक्मिणीवल्लभं विजययात्रातः प्रतिनिवृत्तं पश्याव आर्यपुत्रम्।

ग. अहो यथा नामसादृश्येन वञ्चिता। भवतु तावत्। एनामनुसृत्य विनोदयामि। यथा प्रियसख्यै रोचते।

घ. हला! कुत्र स महानुभावः।

चन्द्रलेखा— (क) हळा! भणामि पुरदो वसन्तो एव्व माहवो त्ति। ता अण्णं चिंतिदं उज्झिअ पेच्छ णं।

नायकः— [सशङ्काविमर्शम्] न खलु किमिह निगूढस्थितोऽपि ज्ञातोऽहमनया विदग्धचेट्या।

कुवलयावली— [पुनर्विलोक्य सविषादं] (ख) हळा! कहिं सो जउउळसेहरो माहवो जं पुरतो वसंतो त्ति तुमं भणासि।

चन्द्रलेखा— [सास्मितम्] (ग) हळा! मए भणिदो ऋदुउळसेहरो माहवो आरामम्मि सव्वदा दीसइ। तुए उण परिण्णादो जउउळसेहरो माहवा कहिं वा ण आणामि।

नायकः—साधु चन्द्रलेखे! साधु।

अपूर्वसंविधानेन तरङ्गितचमत्कृतेः।
पारितोषिकदानेऽहमधमर्णो भवामि ते ॥ ११ ॥

कुवलयावली—(घ) हळा! तुए एव्वं वंचिदह्मि।

चन्द्रलेखा—(ङ) हळा! तुए एव्व तुमं वंचिदा ण उण मए। जं अत्थंतरे अहिणिविट्ठासि।

क. हला! भणामि पुरतो वसन्त एव माधव इति। तदन्यत् चिन्तितं त्यक्त्वा पश्यैनम्।

ख. हला! कुत्र स यदुकुलशेखरो माधवः, यं पुरतो वसन्तिति त्वं भणासि।

ग. हला! मया भणितः ऋतुकुलशेखरो माधव आरामे सर्वदा दृश्यते। त्वया पुनः परिज्ञातो यदुकुलशेखरो माधवः कुत्र वा न जानामि।

घ. हला! त्वयैवं वञ्चितास्मि।

ङ. हला! त्वयैव त्वं वञ्चिता, न पुनर्मया। यदर्थान्तरेऽभिनिविष्टासि।

कुवलयावली—(क) हळा! सिणिद्धजणवंचणसीळाए तुह सहित्तणं विसज्जेमि । [इति पदान्तरे तिष्ठति] ।

चन्द्रलेखा— [कनिष्ठिकायां गृहीत्वा] (ख) हळा! मा कुप्प णम्मकेळीए ।

[कुवलयावली बलादङ्गुलीमाकृष्य पुनरपि पदान्तरे तिष्ठति ।]

चन्द्रलेखा—(ग) बलिअं खु कुपिदा एसा जेण गळिअं वि मणिमुद्दिअं ण आणादि । ता णं गह्णिअ ढक्केमि ।

[तथा करोति]

नायकः— [सविस्मयम्]

दृष्टिप्रतिबन्धकृता मुक्ता प्रतिभाति हेतुना सेयम् ।
झटिति (च) वनितावरणा शस्त्रैः शातेव शम्बराराते: ॥१२॥

हन्त फलितोऽयमस्माकमनुसरणव्यापारः । यतः,

सञ्चारिणी रतिपतेरिव वैजयन्ती
साक्षात्कृता रतिपतेरधिदेवतेव ।
मूर्ता जगज्जनदृशामिव भाग्यरेखा
शातोदरी नयनगोचरतामुपैति ॥ १३ ॥

[चिरं निर्वर्ण्य] न खल्वियं स्त्रीमात्रम् । किन्तु

कुसुमायुधलक्ष्मीर्वा मोहनविद्याविलासरेखा वा ।
सौभाग्यकन्दली वा

क. हला ! स्निग्धजनवञ्चनशीलायास्तव सखीत्वं विसर्जयामि ।

ख. हला ! मा कुप्य नर्मकेल्या ।

ग. बलीयः खलु कुपितैषा । येन गलितामपि मणिमुद्रिकां न जानाति । तदेनां गृहीत्वा स्थापयामि ।

किं बहुना —

मम लोचनभाग्यदेवतैवेयम् ॥ १४ ॥

[विचिन्त्य] जातविस्रम्भयोरनयोरहमात्मानं दर्शयामि ।

[तथा करोति]

[चन्द्रलेखा नायकं विलोक्य सहर्षसम्भ्रमं प्रणमति]

नायकः — [सप्रसादम्] सखि! कुशलमन्तःपुरचारिणे जनाय ।

चन्द्रलेखा —(क) अज्ज देवस्स विजयलच्छीवल्लहस्स पआरविंददंसणेण ।

कुवलयावली —(ख) [विलोक्य स्वगतम्] अह्मो सुन्देरविसेसो जउदेवस्स । [सानुरागं निर्वर्ण्य] अतिमेत्तसंमोहणत्तणं आकिदिविसेसस्स । (इत्यवलोकयति) ।

चन्द्रलेखा —[आकूतमस्याः परिज्ञायात्मगतम्] (ग) अह्मो इअं भट्टारअंमि अणुरत्तलोअणा संवुत्ता । अहवा जुज्जइ खु चंदम्मि राओ चंदिआए

कुवलयावली —(घ) हला! एहि देवीए समीपं गच्छामो । [इति सखीमाकर्षति]

क. अद्य देवस्य विजयलक्ष्मीवल्लभस्य पदारविन्ददर्शनेन ।

ख. अहो सौन्दर्यविशेषो यदुदेवस्य । अतिमात्रसम्मोहनत्वमाकृतिविशेषस्य ।

ग. अहो इयं भट्टारकेऽनुरक्तलोचना संवृत्ता । अथवा युज्यते खलु चन्द्रे रागश्चन्द्रिकायाः ।

घ. हला! एहि देव्याः समीपं गच्छावः ।

चन्द्रलेखा — (क) हळा! भट्टिणा अविसज्जिदा कहं गच्छेमि । ता विण्णवेहि भट्टारअं । एसा विसज्जीअदु त्ति ।

कुवलयावली— [सकृत्रिमसंरम्भं सखीं विसृज्य द्वित्राणि पदानि गत्वा पदस्खलितमभिनीय, आत्मगतम्] (ख) अंहो मज्झ चरणा इदोमुहं णप्पसरंति । [परिवृत्य प्रकाशम्] हळा! ण विसुमरेहि एदं अविणअं । देवीए विण्णवेमि ।

चन्द्रलेखा — (ग) हळा! ण विसुमरेमि । तुमं गच्छ दाव ।

कुवलयावली —(घ) हळा! एहि त्ति । [सविनयं सखीमाकर्षति ।]

नायकः — [आत्मगतम्]

क्षणविनयरोषपरिगतिरकथितकथनेन सूचिताकूता ।
कन्या विस्रम्भकथासुकृतबद्धं तत् सुखयति स्वान्तम्
॥ १५ ॥

क. हला! भर्त्रा विसर्जिता कथं गच्छामि । तद् विज्ञापय भट्टारकम्, एषा विसृज्यतामिति ।

ख. अहो स्तब्धचरणावितोमुखं न प्रसरतः । हला! न विस्मरैतमविनयम् । देव्यै विज्ञापयामि ।

ग. हला! न विस्मरामि । त्वं गच्छ तावत् ।

घ. हला! एहीति ।

[प्रकाशम्] चन्द्रलेखे! भवत्योर्माधवश्रीविलोकनान्तरायो मा भूत्। यतो वयमपसरामः।

चन्द्रलेखा — [जनान्तिकम्] (क) हळा! उज्जाणंतरिदेण भट्टिणा आअण्णिदपुव्वो एव्व अह्माणं वीसम्भसंवादो।

कुवलयावली — [सासूयम्] (ख) हळा! तुह सिळिट्ठवादप्पओएण अतिमेत्तं ळहूकअं ह्मि।

चन्द्रलेखा — (ग) हळा! तुह परिक्खळिदवादप्पओएण अहं वि अतिमेत्तं ळहूकअं ह्मि।

[कुवलयावली सव्रीडस्मितं नम्रमुखी तिष्ठति]

[नेपथ्ये]

(घ) हळा चंदळेहे! किअच्चिरं कुवळआवळिं वणसंचारेण आआसिदं करेसि त्ति देवी कुप्पइ। ता आणेहि णं।

[सर्वा आकर्णयन्ति।]

चन्द्रलेखा — (ङ) अणुजाणादु देव्वो अह्मे गमणस्स।

क. हला! उद्यानान्तरितेन भर्त्राकर्णितपूर्व एवास्माकं विस्रम्भसंवादः।

ख. हला! तव श्लिष्टवादप्रयोगेणातिमात्रं लघूकृतास्मि।

ग हला! तव परिस्खलितवादप्रयोगेणाहमप्यतिमात्रं लघूकृतास्मि।

घ. हला चन्द्रलेखे! कियच्चिरं कुवलयावलीं वनसञ्चारेणायासितां करोषीति देवी कुप्यति। तदानयैनाम्।

ङ. अनुजानातु देव आवयोर्गमनस्य।

नायकः — भद्रे गम्यतां पुनरागमनाय।

[उभे सभयसम्भ्रमं निष्क्रान्ते।]

नायकः — [विलोक्य] कथमशाड्वलेऽपि बालयवसाभिलाषी लीलामृगः। [निरूप्य] हन्तेयं मरतकमणिमुद्रिका। [गृहीत्वा निर्वर्ण्य सविस्मयम्] कथमत्र मणेरन्तरा छायाच्छलादक्षरपङ्क्तिः।

कन्या करेण मणिमुद्रिकयाङ्कितेन
पाञ्चालिकाभ्रममियं विदधीत पुंसाम्।
मुद्रापि यस्य भुवि गच्छति दृश्यभाव-
मस्याः करग्रहणमङ्गलमेष यायात्॥ १६॥

इति।

[विचिन्त्य]

नूनमस्याः प्रभावेन सा तथा वामलोचना।
रत्नपाञ्चालिकाभ्रान्तिमकरोन्मम चक्षुषोः॥ १७॥

नूनमेतदन्वेषणाय सखीसमेता कुवलयावली पुनरिमं प्रदेशमायास्यति। तदिहैव मुहूर्तमनालक्षितस्तामनुपालयामि।

[इति निष्क्रान्ताः सर्वे।]

॥ प्रथमोऽङ्कः॥

अथ द्वितीयोऽङ्कः ।

[ततः प्रविशति विदूषकः]

विदूषकः — (क) अहो रहस्सो त्ति कहिदस्स पिअवअस्सागमणस्स रक्खणादो मह जठरो णीसासरोहेणेव पूरिज्जइ । ता विअणम्मि इमस्सिं विळासुज्जाणे हस्सपूरं किं वि परिवाहइस्सम् । ही ही णिज्जिदं पिअवअस्सेण । परिणमिअं अह्माणं भाअहेएण । अज्ज दीसइ विळासुज्जाणवासम्मि विअअळच्छीपिअसहो वयस्सो । [इति हर्षेण नृत्यन् सशङ्कं विरम्य] अह्मे मंतरक्खणे बुद्धिप्पमादो मज्झ । जं अन्तेउरपरिचारिकासंचरणजोग्गे उज्जाणम्मि गोवणिज्जं आघोसेह्मि । [विलोक्य] एसो खु पिअवयस्सो णं उपसप्पामि ।

[प्रविश्य]

नायकः — [मुद्रिकां निर्वर्णयन्]

तिरयसि यन्मधुरगिरो
लावण्यं मदनराज्यमुद्रायाः ।
दुरितेन तेन मुद्रे!
स्वपदपरिभ्रंशमुपगता भवती ॥ १ ॥

क. अहो! रहस्यमिति कथितस्य प्रियवयस्यागमनस्य रक्षणान्मम जठरो निःश्वासरोधेनेव पूर्यते । तद् विजनेऽस्मिन् विलासोद्याने हर्षपूरं किमपि परिवाहयिष्यामि । ही ही निर्जितं प्रियवयस्येन । परिणतमस्माकं भागधेयेन । अद्य दृश्यते विलासोद्यानवासे विजयलक्ष्मीप्रियसखो वयस्यः । अहो! मन्त्ररक्षणे बुद्धिप्रमादो मम । यदन्तःपुरपरिचारिकासञ्चरणयोग्य उद्याने गोपनीयमाघोषयामि । एष खलु प्रियवयस्यः ननूपसर्पामि ।

विदूषकः — [उपसृत्य] (क) विअअळच्छिपरिग्गहेण वड्ढइ पिअवअस्सो ।

नायकः— [विलोक्य] सखे! सुखेन स्थीयते ।

विदूषकः — (ख) अज्ज पिअवअस्सस्स मुहारविंद-संदंसणेण । अज्ज मे सुदिणं जादं ।

नायकः — सखे! श्रीवत्स!

वरतनुमनिरीक्ष्य कन्यकां
कुसुमशरासविकासदेवताम् ।
नयनयुगफलं न लब्धवान्
यदिह विलम्ब्य समागतो भवान् ॥ २ ॥

श्रीवत्सः — [सकौतुकम्] (ग) किं (एत्थ ?) एत्थ तुए विळोइदा अज्ज ।

नायकः—अथकिम् । सखे कदाचिदपि तां विलोकयिता भवानिति यथानुभवमेव ते निवेदयामि ।

नितम्बो बिम्बेन प्रहसति रथाङ्गं रतिपतेः
करग्राह्यो मध्यस्त्रिवलिपरिणद्धो वरतनोः ।
समाक्रान्तोपान्तं कुचयुगलमाकीलितमिव
स्वभावादालोले प्रसृतिपरिमेये च नयने ॥ ३ ॥

क. विजयलक्ष्मीपरिग्रहेण वर्धते प्रियवयस्यः ।

ख. अद्य प्रियवयस्यस्य मुखारविन्दसन्दर्शनेन । अद्य मे सुदिनं जातम् ।

ग. किमत्र त्वया विलोकिताद्य ।

श्रीवत्सः—(क) अहो णिब्भरत्तणं जोव्वणस्स ।

नायकः—सखे निवेद्यते खलु परस्मै यत्तु जातमस्पृष्टपूर्वमुपमानेन तत् खलु निरवद्यं दुर्लभम् ।

पद्मं पङ्कनिकेतनं करिकरावाबाल्यतः कर्कशौ
रौक्ष्यं वायसशिक्षया परिगताः पुंस्कोकिलानां गिरः ।
मीनानां जडसङ्गतिः सितरुचेः सा पूर्णता पाक्षिकी
तन्मन्ये तरलेक्षणा न लभते स्वाङ्गोपमानं मनाक् ॥४॥

श्रीवत्सः—[स्वगतम्] (ख) अहो बलिअं खु अहिणिवेसो णवदंसणे जणे पिअवअस्सस्स । ता ओसरं णो दाइस्सं दाव । [प्रकाशम्] भो राआणो णवप्पिआ होंति त्ति दाणिं सच्चो लोअवादो । जं तुमं सअलगुणसिळाहणिज्जं देवीजणं अवमण्णिअ जं कं वि कण्णअं अहिणंदासि । अहवा पसिद्धं खु एदम् ।

अण्णस्सिं वसइ गुणो पहूण चित्तं खु रमइ अण्णस्सिं ।
कमळे खंडिअपेम्मा चंदो कुमुदं पसाएदि ॥ ५ ॥

क. अहो निर्भरत्वं यौवनस्य ।

ख. अहो बलवान् खल्वभिनिवेशो नवदर्शने जने प्रियवयस्यस्य । तदवसरं न दास्यामि तावत् । भोः! राजानो नवप्रिया भवन्तीतीदानीं सत्यो लोकवादः । यत् त्वं सकलगुणश्लाघनीयं देवीजनमवमत्य यां कामपि कन्यकामभिनन्दसि । अथवा प्रसिद्धं खल्वेतत् ।

अन्यस्मिन् वसति गुणः प्रभूणां चित्तं खलु रमतेऽन्यस्मिन् ।
कमले खण्डितप्रेमा चन्द्रः कुमुदं प्रसादयति ॥

नायकः—सखे! वस्तुगुणविशेषो विवेकिनां सौहार्द-मुत्पादयति ।

श्रीवत्सः—(क) तुज्झ कामं णीदो विवेओ पुराणमळ-सेअपिंछिळचिउरबंधेसु घोसकुळपुरंधिअणेसु चोरिअरआ-हिळासेण जाणिदो एव्व ।

नायकः—सखे! तवायं किमाशयः, यदियमस्मन्मनो-रथभूराभिरूप्येण न देवीजनस्य तुल्येति ।

श्रीवत्सः—(ख) तह एव्व । जह पिअवअस्सो वक्खाणं करेइ ।

नायकः—सर्वातिशायि तस्या लावण्यमसाक्षात्कुर्वतो भवतो यदुचितं तदभिदधासि । किं बहुना, श्रूयताम्—

[1]विलोलभ्रूवीचेर्विचलितकटाक्षोत्पलवनात्
कनद्ग्रीवाकम्बोः कुचयुगलचक्राङ्कमिथुनात् ।
लताङ्ग्या लावण्यादमृतसरसः कैरपि कणै-
र्विकीर्णैरन्यासां रुचिमकृत धातेति कलये ॥ ६ ॥

क. तव कामं नीतो विवेकः पुराणमलसेकपिच्छिलचिकुरबन्धेषु घोषकुलपुरन्ध्रीजनेषु चौर्यरताभिलाषेण ज्ञात एव ।

ख. तथैव । यथा प्रियवयस्यो व्याख्यानं करोति ।

---

१. 'विलोलभ्रूवीचेर्विरचितकटाक्षोत्पलवनात्' क. पाठः.

श्रीवत्सः— [सप्रत्ययादरम्] (क)

भद्दस्सहस्सअंतेउरपइणो तुज्झ हरइ जा चित्तं ।

सा (इळ) ळळणारअणं अणग्घं खु (होदि) माणिक्कं ॥

अह से तुमं उद्दिसिअ कीरिसो दिट्ठिविसेसो ।

नायकः—

अभिलाषो वामाक्ष्याः
प्रदीप इव यवनिकाप्रकाशाभ्याम् ।
मन्दाक्षमन्मथाभ्यां
न च प्रतीतो न चाप्रतीतश्च ॥ ८ ॥

तदानीं खलु

प्रत्यालोकनलालसैरपि सखे मन्दाक्षमन्दीकृतैः
सव्याजं प्रविसारितैरपि परं कातर्यपर्याकुलैः ।
संवादे परिवर्तितैरनुपदं गाम्भीर्यसम्प्रेक्षितैः
विक्रीतोऽस्मि विलोकितैर्वरतनोराकूतकर्गेजयैः ॥ ९ ॥

श्रीवत्सः—(ख) भो वअस्स! एआरिसो अहिळासो । इदो [1]परं सा तुए किं उपेक्खिदव्वा ।

नायकः—सा किल भगवता नारदेन परिन्यासीकृता विदर्भराजनन्दनाया वशे वर्तते ।

क. भद्रसहस्रान्तःपुरपतेस्तव हरति या चित्तम् ।
सा (किल) ललनारत्नमनर्घं खलु भवति माणिक्यम् ॥
अथ तस्यास्त्वामुद्दिश्य कीदृशो दृष्टिविशेषः ।

ख. भो वयस्य! एतादृशोऽभिलाषः । इतः परं सा त्वया किमुपेक्षितव्या ।

---

1. 'अपरं ति सा' क. पाठः.

श्रीवत्सः—(क) ता तुज्झ एसम्मि अहिलासो पण्णगीए फणारअणाहिळासो व्व दुळ्ळहो त्ति तक्केमि ।

नायकः—[सनिःश्वासम्] सखे! श्रीवत्स! तावदास्तामनवधेः सुकृतशेवधेः परिणामस्तावानभिलाषः । किन्तु

सकृदपि पुनरक्ष्णोर्हारि किं सन्निकर्षे
प्रणयपिशुननानाभावसम्भेदरम्यम् ।
शिव शिव यदि तस्या वक्त्रमालोकयेयं
स हि मम सुकृतानां सञ्चितानां विपाकः ॥ १० ॥

[ततः प्रविशति पटाक्षेपेण कुवलयावली चन्द्रलेखा च ।]

चन्द्रलेखा—(ख) हळा मंदबुद्धीए *असिदा मणिमुद्दिआ आसण्णसंचारिणो भट्टिणो दंसणपहे पडिस्सदि । अहवा अण्णस्स वेत्ति आउळह्मि ।

कुवलयावली—[आत्मगतम्] (ग) कुदो तारिसं भाअहेअं कुवळआवळीए । जेण सो महाणुभाओ मणिमुद्दिअं पुळइ । [प्रकाशम्] हळा ता तुवरिदं गदुअ अण्णेसामो ।

[इति परिक्रामतः ।]

क. तत् तवैतस्यामभिलाषः पन्नग्याः फणारत्नाभिलाष इव दुर्लभ इति तर्कयामि ।

ख. हला ! मन्दबुद्ध्या असिता मणिमुद्रिकासन्नसञ्चारिणो भर्तुर्दर्शनपथे पतिष्यति । अथवान्यस्य वेत्याकुलास्मि ।

ग. कुतस्तादृशं भागधेयं कुवलयावल्याः । येन स महानुभावो मणिमुद्रिकां पश्यति । हला ! तत् त्वरितं गत्वान्विष्यावः ।

---

* मंसिदा इति स्यात् ।

श्रीवत्सः—(क) भो वअस्स! तुण्हीं चिट्ठ। एसो खु विस्संभगोट्ठीणिळअस्स दुट्ठदोसीपुत्तळस्स सळ्ळावो विअ सुणीअदि।

नायकः— नूनमियं मणिमुद्रिकान्वेषणाय समागता सवयस्या कुवलयावली भविष्यति। सखे! निकुञ्जपुञ्जपिहितावालोकयावः। [तथा कुरुतः।]

श्रीवत्सः—(ख) का वा मणिमुद्दिआ। किं वा समण्णिसंतित्ति ण आणामि।

नायकः—सखे! कुवलयावल्या मणिमुद्रिका केनापि हेतुना परिभ्रष्टा मया दृष्टा [इति मणिमुद्रिकां दर्शयति।]

श्रीवत्सः— [निर्वर्ण्य] (ग) वअस्स! कुदो एत्थ मणिमुद्दिआ।

नायकः— [स्वगतम्] अहो सामर्थ्यमचिन्तनीयं तपोविशेषस्य। येनायं मया दर्शितामपि मुद्रिकां न पश्यति। [प्रकाशम्] विदितमधुना तत्र ब्राह्मण्यमस्माभिः। यदियमनधीतसन्ध्याविधिना न लक्ष्यते मुद्रिकेति लिखितमन्त्रैव।

क. भो वयस्य! तूर्ष्णीं तिष्ठ। एष खलु विस्रम्भगोष्ठीनिलयस्य दुष्टदासीपुत्रकस्य सल्लाप इव श्रूयते।

ख. का वा मणिमुद्रिका, किं वा समन्विष्यन्तीति न जानामि।

ग. वयस्य कुतोऽत्र मणिमुद्रिका।

श्रीवत्सः— (क) केणेदं अहिलिहिदं।

नायकः— सखे! ब्रह्मर्षिणा नारदेन।

श्रीवत्सः—(ख) भो! महाराज! तुमं विणा को अण्णो वीणागाअकस्स तस्स बंह्मबंधुणो वअणं पमाणं करिअ सिरिवस्सं आहिक्खिवति।

नायकः— अनयैव निवेद्यते तत्रभवतो भवतश्च शक्तितारतम्यम्।

श्रीवत्सः—(ग) अहो तुज्झ वअस्सस्स सत्तितारतम्मपरिण्णाणं। जं तुह पसाएण पच्चूसम्मि साअं अ अमिअसक्करखंडमोदअसदं खादंतो सिरिवस्सो सत्तिहीणो। सो उण कंदमूलपलासणो णारदो सत्तिमंतो त्ति आळविज्जइ। [ससंरम्भं वामसुष्टिमुद्यम्य] भो! महाराअ! तं सत्तिमंतं इहाणेहि सिग्धं। मह एक्कमुट्ठिणा महोर्सिं महिम्मि पाडइस्सं। अण्णहा इमं जण्णसुत्तं छिण्णं काऊण परिक्खिवामि। [इति यज्ञसूत्रस्थानं परामृशन् सविषादमात्मगतम्] हरिसणच्छणावसरे

क. केनेदमभिलिखितम्।

ख. भो महाराज! त्वां विना कोऽन्यो वीणागायकस्य तस्य ब्रह्मबन्धोर्वचनं प्रमाणं कृत्वा श्रीवत्समधिक्षिपति।

ग. अहो! तव वयस्यस्य शक्तितारतम्यपरिज्ञानम्। यत् तव प्रसादेन प्रत्यूषे सायं चामितशर्कराखण्डमोदकशतं खादन् श्रीवत्सः शक्तिहीनः। स पुनः कन्दमूलफलाशनो नारदः शक्तिमानित्यालप्यते। भो महाराज! तं शक्तिमन्तमिहानय शीघ्रम्। ममैकमुष्टिना महर्षिं मह्यां पातयामि। अन्यथेदं यज्ञसूत्रं छिन्नं कृत्वा परिक्षिपामि। हर्षनर्तनावसर

एव्व छिण्णं भिण्णं जण्णसुत्तं । ता अण्णदो पसंगं करेमि । [विलोक्य] भो! एसा खु चंदळेहा । का उण इअं अण्णतरा । [विचिन्त्य] भो ! मए परिण्णादं । कुविदं मं अणुणेदुं विळासवणदेवदा सअं एइ । अहवा तुमं जअळच्छिसहिदं अहिणंदिदुं एव्व एइ ।

नायकः— [सस्मितम्] सखे! सेयं मया कथिता कुवलयावली नाम । न पुनर्वनदेवता ।

श्रीवत्सः— (क) अच्चरिअं अच्चरिअं । अपुव्वा ईरिसी सोभग्गळच्छी माणुसीसु । वअस्स! ठाणे खु दे दिट्ठी सज्जइ ।

चन्द्रलेखा— [अभितो विचित्य सविषादम्] (ख) हळा ण दीसइ मुद्दिआ । किं करेहि ।

कुवलयावली — [अश्रुतिमभिनीय, आत्मगतम्] (ग) अइ चित्त! तुमं सहीए आसंकिदमेत्तेणेव्व किंत्ति अप्पाणं किदत्थं चिंतेसि ।

एव छिन्नं भिन्नं यज्ञसूत्रम् । तदन्यतः प्रसङ्गं करोमि । भोः एषा खलु चन्द्रलेखा । का पुनरियमन्यतरा । भो मया परिज्ञातम् । कुपितं मामनुनेतुं विलासवनदेवता स्वयमेति । अथवा त्वां जयलक्ष्मीसहितमभिनन्दितुमेवैति ।

क. आश्चर्यमाश्चर्यम् । अपूर्वेदृशी सौभाग्यलक्ष्मीर्मानुषीषु । वयस्य! स्थाने खलु ते दृष्टिः सज्जते ।

ख. हला न दृश्यते मुद्रिका । किं कुर्वः ।

ग. अयि चित्त! त्वं सख्या आशङ्कितमात्रेणैव किमित्यात्मानं कृतार्थं चिन्तयसि ।

चन्द्रलेखा— [आत्मगतम्] (क) कहं एसा अण्णचित्ता णं मे वअणं अहिमण्णेइ । [प्रकाशम्] हळा णं भणामि एत्थ रअणाळंकारो ण दीसइ त्ति ।

कुवलयावली— (ख) ण केवळं रअणाळंकारो ।

चन्द्रलेखा— (ग) किं उण अण्णं ।

कुवलयावली— [आत्मगतम्] (घ) अंहो चित्तस्स मे अधीरत्तणं । जं रअणगब्भाळंकारो सो वि महाभाओ ण दीसइ त्ति (इ?)आढ(उ?)त्तम्मि । होदु एव्वं दाव । [प्रकाशम्] हळा रअणाळंकारहारिणो जणस्स चरणविण्णासो वि ण दीसइ ।

चन्द्रलेखा— (ङ) भट्टिणो एव्व चरणविण्णासो दीसइ ण उण अण्णस्स जणस्स ।

कुवलयावली— [सनर्मस्मितम्] (च) हळा जुज्जइ इमस्सि तुह आसंका । जं सो किळ काळिंदीजळविहारिणीणं वळ्ळवणिअंबिणीणं अंबरचोरो त्ति सुणीआदि ।

क. कथमेषान्यचित्ता न मे वचनमभिमन्यते । हला ननु भणाम्यत्र रत्नालङ्कारो न दृश्यत इति ।

ख. न केवलं रत्नालङ्कारः ।

ग. किं पुनरन्यत् ।

घ. अहो चित्तस्य मे अधीरत्वं, यद् रत्नगर्भालङ्कारः सोऽपि महाभागो न दृश्यत इत्यारब्धासि । भवतु एवं तावत् । हला रत्नालङ्कारहारिणो जनस्य चरणविन्यासोऽपि न दृश्यते ।

ङ. भर्तुरेव चरणविन्यासो दृश्यते न पुनरन्यस्य जनस्य ।

च. हला ! युज्यतेऽस्मिन् तवाशङ्का । यत् स किल कालिन्दीजलविहारिणीनां वल्लवनितम्बिनीनामम्बरचोर इति श्रूयते ।

नायकः— सखे! लब्धावसरोऽस्मीति प्रकाशो भवितु-मिच्छामि।

श्रीवत्सः— (क) खंडमोदए हत्थगदे किं जीहाणि-अंतणेण।

[उभावुपसर्पतः।]

नायकः—

पद्भ्यां पद्मरुचिं निषङ्गसुषमां जङ्घाश्रिया धून्वती-
मूरुभ्यां कदळीप्रभामुरसिजद्वन्द्वेन कुम्भश्रियम्।
पूर्णेन्दुद्युतिमाननेन विदितं मुग्धे! स्वयं मुष्णतीं
मामेवं विपरीतभाषिणि! वृथा पाटच्चरं भाषसे॥ ११॥

अथवा चोरो भवामि तावदहम्।

चोरस्यापि धनं हरते हरन्ती कुटिलेक्षणे।
चौर्यविद्याविशेषेण मामतिक्रम्य वर्तसे॥ १२॥

पश्य,

ऊरुभ्यां करभोरु! चोरयासि मे कौमोदकीविभ्रमं
नाभिस्ते नतनाभि! चक्रसुषमामाक्रामतिच्छद्मना।
कण्ठस्ते कळकण्ठि! वञ्चयति मे तां पाञ्चजन्यप्रभां
चारुभ्रूलतया चकोरनयने! मुष्णासि शार्ङ्गश्रियम्॥ १३॥

क. खण्डमोदके हस्तगते किं जिह्वानियन्त्रणेन।

कुवलयावली — [सलज्जासाध्वसं सखीमन्तर्धाय, आत्मगतम्] (क) अह्हो ! पुरुसोत्तमस्स समाळावचातुरी । [जनान्तिकं] हळा ! णिवारेहि णं पसंगंतरेण ।

चन्द्रलेखा — (ख) भट्टारअ ! एसा इदं विण्णवेदि । तारिसीए मह अंतरंगं चोरेंतो महाराओ एक्को सरिसो चोरो त्ति ।

कुवलयावली — (ग) अवेहि दुल्ळळिदे ! अवेहि । अए अकहिदं कहेसि । [इति सखीमभिक्षिप्य पराङ्मुखी तिष्ठति ।]

श्रीवत्सः — (घ) चंदळेहे ! अंतरंगचोरत्तणं समाणं एव्व दोणं एदाणं ।

चन्द्रलेखा — (ङ) अहिअं खु मुद्दिआहरणं तुह्मेसु ।

कुवलयावली — [सप्रसादस्मितं सखीमवलोकयति ।]

नायकः — [नायिकायाः पुरो भूत्वा] यदीयं त्वदीया स्वर्णविन्यासा मुद्रिका तदादीयताम् । [इति स्वकरस्थितां मुद्रिकां दर्शयति ।]

क. अहो ! पुरुषोत्तमस्य समालापचातुरी । हला ! निवारयैनं प्रसङ्गान्तरेण ।

ख. भट्टारक ! एषेदं विज्ञापयति । ताहृश्या ममान्तरङ्गं चोरयन् महाराज एकः सदृशश्चोर इति ।

ग. अपेहि दुर्ललिते ! अपेहि । अये अकथितं कथयसि ।

घ. चन्द्रलेखे ! अन्तरङ्गचोरत्वं समानमेव द्वयोरेतयोः ।

ङ. अधिकं खलु मुद्रिकाहरणं युष्मासु ।

नायिका — [विलोक्य सहर्षमात्मगतम्] (क) अहिलिहिदक्खरा मुद्दिआ उवलद्धा महाभाएण । [हृदयमुद्दिश्य] अइ हिअअ! दाणिं मणोरहो तुह ईरिसो अंकुरिदो । [मुद्रिकामादातुमिच्छति । कराग्रकम्पमभिनीय जनान्तिकम्] हळा वेवइ मे अग्गहत्थो । ता तुमं गेह्ण एदं ।

चन्द्रलेखा — (ख) हळा! भट्टिणा अ चोरिअंतरंगाए तुह किंत्ति वेवंतो होइ अग्गहत्थो ।

कुवलयावली — (ग) हळा! किं त्ति मं ळज्जिदं ळज्जेसि ।

चन्द्रलेखा — (घ) भट्टारअ! इतो मुद्दिअं पसादेइ ।

श्रीवत्सः — (ङ) भो! अहं भणामि । अण्णस्स धणं अण्णस्स हत्थे ण होदु ।

नायकः — [सस्मितम्] चन्द्रलेखे! न्याय्य एवायं पन्थाः यदाह विद्वानयं श्रीवत्सः ।

चन्द्रलेखा — (च) हळा! सअं एव्व गह्ण ।

क. अभिलिखिताक्षरा मुद्रिकोपलब्धा महाभागेन । अयि हृदय! इदानीं मनोरथस्तवेदृशोऽङ्कुरितः । हला! वेपते मेऽग्रहस्तः । तत् त्वं गृहाणैनाम् ।

ख. हला! भर्त्रा च चोरितान्तरङ्गायास्तव किमिति वेपमानो भवत्यग्रहस्तः ।

ग. हला! किमिति मां लज्जितां लज्जयसि ।

घ. भट्टारक! इतो मुद्रिकां प्रसादय ।

ङ. भोः! अहं भणामि । अन्यस्य धनमन्यस्य हस्ते न भवतु ।

च. हला! स्वयमेव गृहाण ।

कुवलयावली — [कथञ्चित् करं प्रसारयति ।]

नायकः — भद्रे! कनीयसीमङ्गुलीं प्रसारय । स्वयमेव मुद्रिकामारोपयामि ।

कुवलयावली — [आत्मगतम्] (क) अज्ज का गई ।

चन्द्रलेखा — [सप्रणयकोपम्] (ख) हळा! तत्थ एव्व किअच्चिरं विळम्बेसि ।

कुवलयावली — [कथञ्चिदङ्गुलीं प्रसारयति ।]

नायकः — [कनीयसीमङ्गुलीमवलम्ब्य शनैरस्या मुखं साकूतमवलोकयति ।]

कुवलयावली — [सरोमाञ्चसितं नतमुखी तिष्ठति ।]

[नेपथ्ये]

(ग) हळा चंदळेहे! किअच्चिरं णववत्थुदंसणकुदूहळेण कुवळआवळिं विणोदेसि । किअच्चिरं पिअपसाहणा देवी अब्भंतरं गदा । अण्णेसंती वि तुम्हे अहं णो पेच्छामि ।

चन्द्रलेखा — [आकर्ण्य] (घ) अहो चओरि(आ) इदो आअच्छदि ।

[राजा कुवलयावलीं विसृज्य मुद्रिकां पातयन् सवयस्यस्तिरोहितस्तिष्ठति ।]

क. अद्य का गतिः ।

ख. हला! तत्रैव कियच्चिरं विलम्बसे

ग. हला चन्द्रलेखे! कियच्चिरं नववस्तुदर्शनकुतूहलेन कुवलयावलीं विनोदयसि । कियच्चिरं प्रियप्रसाधना देवी अभ्यन्तरं गता । अन्विष्यन्त्यपि युवाम् अहं न पश्यामि ।

घ. अहो चकोरिका इत आगच्छति ।

[प्रविश्य]

चकोरिका —हळा! चंदलेहे! किअच्चिरं [इत्यादि पठति।]

चन्द्रलेखा — (क) इदो इदो पिअसही ।

चकोरिका — [उपसर्पति ।]

चन्द्रलेखा—(ख) हळा सहीए मणिमुद्दिआ परिब्भट्ठा। तं अण्णेसामो । [सर्वा मुद्रिकामन्विष्यन्ति ।]

चन्द्रलेखा — [निर्वर्ण्य सहर्षम्] (ग) इअं मुद्दिआ [इति गृहीत्वा] हळा! एहि गच्छामो। [इति परिक्रामन्ति ।]

नायकः — कथं प्रयात्येव प्रियतमा ।

नायिका — [नयने परागपातमभिनीय] (घ) हळा! कुसुम-रयसंपादेण आउळं मह णेत्तं ।

चन्द्रलेखा — [जनान्तिकम्] (ङ) कुसुमसरसंपादेण तुह चित्तं वि । [इति परागमपनयति ।]

कुवलयावली — [सप्रियासूयमिव] (च) हळा! दाणिं वि मे ण होइ लोअणं अवराअं ।

क. इत इतः प्रियसखी ।

ख. हला! सख्या मणिमुद्रिका परिभ्रष्टा । तामन्विष्यावः ।

ग. इयं मुद्रिका । हला! एहि गच्छामः ।

घ. हला! कुसुमरजःसम्पातेनाकुलं मम नेत्रम् ।

ङ. कुसुमशरसम्पातेन तव चित्तमपि ।

च. हला! इदानीमपि मे न भवति लोचनमपरागम् ।

चन्द्रलेखा — (क) हळा! पराओ णिग्गदो णअणादो । रागो खु बळिअं संकंतो दाणिं वि रमइ । ता किं विळम्बेण । एहि गच्छह्मो । [इति निष्क्रान्ताः ।]

श्रीवत्सः — (ख) वअस्स! महुरा खु सक्करेव्व परुसा (ए?)वि दाणिं सिळिट्ठसळ्ळावगोट्ठी ।

नायकः — मधुरेति किमुच्यते ।

ललितकविताविलासाः श्रुतिमधुरालापरागसम्भेदाः ।
युवतिजनपक्षपाता नाकृतपुण्येषु समवेताः ॥ १४ ॥

सखे! किमतःपरं करणीयमस्माकम् ।

श्रीवत्सः — (ग) किं अण्णं सअळणाअरिअळोअणाणंदादो ।

नायकः — यथाभिरुचितं प्रियवयस्याय । [इति परिक्रामन् सस्मरणम्]

उत्फुल्लगण्डमण्डलमुल्लसितदृगन्तसूचिताकूतम् ।
नमयन्त्यापि मुखाम्बुज*मुन्नमितानङ्गसाम्राज्यम् ॥ १५ ॥

[इति निष्क्रान्ताः सर्वे ।]

॥ द्वितीयोऽङ्कः ॥

क. हला! परागो निर्गतो नयनात् । रागः खलु बलवान् सङ्क्रान्त इदानीमपि रमते । तत् किं विलम्बेन । एहि गच्छावः ।

ख. वयस्य! मधुरा खलु शर्करेव परुषापीदानीं श्लिष्टसल्लापगोष्ठी ।

ग. किमन्यत् सकलनागरिकलोचनानन्दात् ।

---

* उन्नमितेति ण्यन्तात् कर्मणि क्तः ।

अथ तृतीयोऽङ्कः ।

[ततः प्रविश्य]

कञ्चुकी — [आत्मनो दशामनुसन्धाय]

रुन्धानया बहुमुखीं गतिमिन्द्रियाणां
वध्वेव गाढमनया जरयोपगूढः ।
अङ्गेन वेपथुमता च जडेन चाहं
गन्तुं पदादपि पदं *गमितुं न चालम् ॥ १ ॥

हन्त विश्वासो नु प्रभूणामाश्वासमुत्पादयाति ।

लक्ष्येषु पाणिपरिवेषमवेक्ष्य तेषु
श्वासावधि त्रिचतुरेषु पदेषु यानम् ।
मैत्री गिरां श्रवसि तारतरश्रुतीनां
देवी तथापि हितकर्माणि मां नियुङ्क्ते ॥ २ ॥

अद्य खलु विदर्भराजनन्दनया सबहुमानमेवमाख्यातोऽस्मि । 'आर्य बभ्रुमुख! पुरा किल कालयवनविजयाय गच्छता आर्यपुत्रेण सङ्कल्पितमासीद् 'भगवति! भवानि! १ रैवतककन्दरकदम्बवनवासिनि! प्रतिनिवर्तनानन्तरमेव मया निखिलपुरन्ध्रिजनानुयातदेवीजनेन तव यात्रामहोत्सवः कारयितव्य इति । तदद्य वयमितो रैवतकमुपसरामः । कुवलयावली पुनरुद्यानविलोकनायासेन बलवदस्वस्थशरीरेति गृह एव चन्द्रलेखया समं निवेशिता । सेयं यथा न

१. 'रैवतककन्दरकदम्बवासिनि!' ख. पाठः.

* क्यजन्तात् तुमुनीदं रूपम् ।

बहिरङ्कणमासादयति तथा त्वया रक्षितव्ये'ति । तदवहितो देवीनिदेशमनुतिष्ठामि ।

[ततः प्रविशति कुवलयावली चन्द्रलेखा च ।]

चन्द्रलेखा —(क) हळा! मुद्दिआविरहेण अकअपंचाळिआभमं तुमं एसो ण आणादि । ता एहि णिक्कंपाओ विळासुज्जाणं गच्छामो ।

कञ्चुकी —[सपाणिपरिवेषं विलोक्य] भोः! कयोरयं पदशब्दः ।

चन्द्रलेखा —(ख) अय्य! चंदळेहा खु अहं । इअं उण इंदीवराळीणामआ अण्णा संचारिआ किं वि रहस्सं कहऊण भट्टिणीए पेसिदा । ता एदं भट्टिणो संमुहं वाचेमि । तुमं कुवळआवळीए घरद्दुवारं ओहिदो रक्खेहि ।

कञ्चुकी —भद्रे! गम्यतां सिद्धये शीघ्रमागम्यतां च । अहमवहितो भवामि । [इति निष्क्रान्तः]

चन्द्रलेखा —(ग) हळा! वंचिदो खु एसो ठविरसोविदळ्ळो ।

क. हला! मुद्रिकाविरहेणाकृतपाञ्चालिकाभ्रमां त्वामेष न जानाति । तदेहि निष्कम्पे विलासोद्यानं गच्छावः ।

ख. आर्य! चन्द्रलेखा खल्वहम् । इयं पुनरिन्दीवरालीनामिकान्या सञ्चारिका किमपि रहस्यं कथयित्वा भट्टिन्या प्रेषिता । तदेतत् भर्तुः सम्मुखं वाचयामि । त्वं कुवलयावल्या गृहद्वारमवहितो रक्ष ।

ग. हला! वञ्चितः खल्वेष स्थविरसौविदल्लः ।

कुवलयावली — [आत्मगतम्] (क) ण आणे कहं एसो अणुसओ (अह्विवो ?) वंचिदव्वो त्ति । [प्रकाशम्] हळा किअद्‌दूरे कदळिआघरं ।

चन्द्रलेखा — (ख) इदं खु । पविसदु पिअसही । दिग्घिआए तरंगसीअरपरिब्भीअसीअळे चंदसिळाअळे उपविसामो ।

[उभे तथाकुरुतः ।]

कुवलयावली — (ग) हळा ! बळिअं खु संदाववंति मह अंगाइं ।

चन्द्रलेखा — (घ) सहि ! [1]सुहणिमित्तं । इह एव्व पच्छाअसीअळे तुज्झ संदावो समिस्सदि ।

[ततः प्रविशति नायकः ।]

नायकः — [मदनावस्थां नाटयन्] कथमभिसन्धीयते पटुधियापि मया धृतेरभिसन्धिपरिपन्थी मन्मथः ।

क. न जाने कथमेषोऽनुशयो वञ्चयितव्य इति । हला ! कियद्दूरे कदलिकागृहम् ।

ख. इदं खलु । प्रविशतु प्रियसखी । दीर्घिकायास्तरङ्गशीकरपरिभ्रमशीतले चन्द्रशिलातले उपविशावः ।

ग. हला ! बलवत् खलु सन्तापयन्ति ममाङ्गानि ।

घ. सखि ! शुभनिमित्तम् । इहैव प्रच्छायशीतले तव सन्तापः शमिष्यति ।

---

1. 'सुखणिमित्तं' ब. पाठः.

जयतितरां रतिजानेरनुभावो निखिलधीरपरिभावी ।
[1]यदसजितापि रणन्ती बाणानन्विष्य शिञ्जिनी भ्रमति ॥ ३॥

[साशंसनम्]

उत्फुल्लगण्डयुगमुद्गतमन्दहास-
मुद्वेलरागमुररीकृतकामतन्त्रम् ।
हस्तेन हस्तमवलम्ब्य कदानु सेवे
सल्लापरूपममृतं सरसीरुहाक्ष्याः ॥ ४ ॥

कथं चिरायति श्रीवत्सः ।

[प्रविश्य विदूषकः ।]

विदूषकः—[सहर्षम्] (क) अज्ज जोगमायामहूसवावदेसेण सअळो वि णअरीसीमंतिणीजणो देवीहिं समं पट्ठाविदो । ता मह मंतप्पहावं पिअसहं णिवेदेमि । [परिक्रम्य] वड्ढदु पिअवअस्सो ।

नायकः—[साकूतस्मितम्] अपि सखे! फलितस्तव निधानसाधने मन्त्रप्रयोगः ।

विदूषकः—(ख) भो मंतबळेण णिक्कासिदे देवीपण्णईळोए सो णिहि केण वि दूसंदेसेण पिआएण दाणि

क. अद्य योगमायामहोत्सवापदेशेन सकलोऽपि नगरीसीमन्तिनीजनो देवीभिः समं प्रस्थापितः । तन्मम मन्त्रप्रभावं प्रियसखं निवेदयामि । वर्धतां प्रियवयस्यः ।

ख. भोः! मन्त्रबलेन निष्कासिते देवीपन्नगीलोके स निधिः

१. 'यदसजिबितापि' ख. पाठः ।

रक्खिज्जइ। उप्पिणी बह्हुमुहं कुवळआवळीरक्खणे णि-उञ्जेइ।

नायकः—सोऽयं सामदानाभ्यामभेदनीयो विश्वासी सौविदल्लः।

श्रीवत्सः—(क) सो खु अहिआरी, तं वि सुणुअमुहेण सावराहं काऊण काराघरंमि किं णिवेसेमि।

नायकः—शान्तं पापं शान्तं पापम्। धिङ् मूर्ख! परमाप्तजने पापमाशङ्कसे।

श्रीवत्सः—(ख) ता सो चिरं सुखी होदु।

नायकः—इमामातपवेलां कदलिकागृहेऽतिवाह्य रज-नीमुखे समुचितमुपायमाचरामः।

श्रीवत्सः—(ग) भो इदं उज्जाणं।

[प्रवेशं नाटयतः।]

राजा—

राजत्कोरककण्टका मधुकरीझङ्कारहुंकारिणी-
रालोलस्तबकस्तनीरविरलानुत्नप्रवालाधराः।

केनापि दुस्सन्दर्शेन पिशाचेनेदानीं रक्ष्यते। रुक्मिणी बभ्रुमुखं कुवलयावली-रक्षणे नियोजयति।

क. स खल्वभिचारी, तमपि शून्यमुखेन सापराधं कृत्वा कारागृहे किं निवेशयामि।

ख. तत् स चिरं सुखी भवतु।

ग. भोः! इदमुद्यानम्।

आलिङ्गन्ति लतावधूरतितरामानम्रशाखाकरै-
रत्यारूढरसा रसालरसिकाः कान्ते वसन्तोत्सवे ॥५॥

श्रीवत्सः— (क) भो! किं फळं वसंतप्पसंसाए। सव्वसमअपट्टबंधो पाउरसमओ पसंसीअदु।

नायकः— कथय कथमेतावानुत्कर्षो वर्षाणाम्।

श्रीवत्सः— (ख) जं तत्थ कण्णरसाअणणिमंतक्खरो णासिआरसाअणपाकगंधो जीहारसाअणपदत्थवित्थरो बम्हणाणं कप्परुक्खसरूवो होइ अपरपक्खो।

नायकः— साधु कुक्षिम्भर! साधु।

श्रीवत्सः— (ग) भो! पेच्छ सअळकरणग्गामहेअरं सोभग्गं सिंगारवणस्स।

नायकः— [सार्धाङ्गीकारम्]

इतो भृङ्गीगीतं विहरणमितो मन्दमरुता-
मितो वल्लीलास्यं परिचितिरितः पुष्परजसाम्।
अतो भूतं तृप्तैरितरकरणैर्हन्त रसना
पुनस्तस्या बिम्बाधरमधु विना शुष्यति मम ॥६॥

क. भोः! किं फलं वसन्तप्रशंसया। सर्वसमयपट्टबन्धः प्रावृट्समयः प्रशस्यताम्।

ख. यत् तत्र कर्णरसायननिमन्त्राक्षरो नासिकारसायनपाकगन्धो जिह्वारसायनपदार्थविस्तरो ब्राह्मणानां कल्पवृक्षसरूपो भवत्यपरपक्षः।

ग. भोः! पश्य सकलकरणग्रामहृद्यं सौभाग्यं शृङ्गारवनस्य।

श्रीवत्सः— (क) भो इयं खु विआसिदारविंदसुंदरमअरंदणीसंदपरिसे(स ? अ)गरुअचक्कवाअउळपक्खविक्खेवकंपंतकुवळअवळआमोदमेदुरमंदमारुआ विळासुज्जाणदिग्घिआ।

नायकः— अत्र खलु।

रक्ताब्जसैकतावर्तरथाङ्गयुगलोत्पलैः।
स्थितमेकत्र तद्गात्रतुलाभ्रष्टाधिकारिभिः॥ ७॥

कुवलयावली— (ख) हळा दहइ मे अंगेसु जरठादवेण संदावो।

चन्द्रलेखा—(ग) बहळदररसाळासप्पच्छाअसीअळे कुदो इमंमि पवेसो आदवस्स।

श्रीवत्सः— [आकर्ण्य निरूप्य] (घ) भो इअं खु चन्दळेहाबुदीआ कुवळआवळी।

नायकः— [सानुरागसम्भ्रमम्] सखे! श्रीवत्स!

कासौ दृशोरमृतवर्त्तिरतर्कणीया
कानन्दसिद्धिघुटिका निरुपाधिसिद्धा।

क. भोः इयं खलु विकसितारविन्दसुन्दरमकरन्दनिष्यन्दपरिषेकगुरुकचक्रवाककुलपक्षविक्षेपकम्पमानकुवलयवलयामोदमेदुरमन्दमारुता विलासोद्यानदीर्घिका।

ख. हला! दहति मेऽङ्गेषु जरठातपेन सन्तापः।

ग. बहलतररसालाशाप्रच्छायशीतले कुतोऽस्मिन् प्रवेश आतपस्य।

घ. भोः! इयं खलु चन्द्रलेखाद्वितीया कुवलयावली।

काकल्पनापरिणता नवकल्पवल्ली
कानक्षरा वसति मोहनमूलविद्या ॥ ८ ॥

श्रीवत्सः— (क) इदं खु कदळिआघरम् ।

नायकः— [विलोक्य]

इयमनिलचलितकदलीदलेषु परिलक्षिता च पिहिता च ।
उत्कण्ठयति मनो मे रतिरिव विश्लेषसंश्लेषैः ॥ ९ ॥

सखे ! प्रसङ्गमुपगम्य यथावसरमुपसरावः ।

श्रीवत्सः— (ख) भो ! भो ! जाणे संगमादो वि पेम्मपरिक्खणं सुहअरं त्ति ।

नायकः— सखे ! परमानन्दसर्वस्वं सर्वमुदाहरसि ।

अन्तर्हितो निगदितानि मनोरमायाः
श्रृण्वन् मुहूर्तमपि भावनिवेदनानि ।
प्रायेण नन्दति यथा न तथा कृतात्मा
वर्षान् सहस्रमपि केवलमेलनेन ॥ १० ॥

[उभौ लतान्तर्हितौ तिष्ठतः]

श्रीवत्सः— (ग) भो ! पेच्छ इमाए वेसणेव्व संदावो सव्वक्खरं आचक्खीअदि ।

क. इदं खलु कदलिकागृहम् ।

ख. भो भो ! जाने सङ्गमादपि प्रेमपरीक्षणं सुखकरमिति ।

ग. भो ! पश्यास्या वेषेणैव सन्तापः सर्वाक्षरमाख्यायते ।

नायकः— सखे! सम्यगुपलक्षितं भवता ।

आकल्पैरतिसान्द्रचन्द्रघुटिकाप्रायैस्तनोस्तर्पणं
श्रीगन्धद्रवलेपनेन कुचयोरत्यन्तमालेपनम् ।
लीलातामरसोदरेण करयोरक्ष्णोश्च संवाहनं
प्रेयस्याः प्रकटीकरोति विषमां हा हन्त तापव्यथाम् ॥

कुवलयावली— (क) संदावकारणं कदळिआघरं संदावणिवारणं त्ति अळीअं मंतेसि ।

[चन्द्रलेखा नवकदलीदलैरेनां छादयन्ती वीजयति ।]

कुवलयावली— (ख) हळा! पुडमं कप्पूरेण धूविदं मअणाणळं दाणिं किंति कदळीदलाणिळेहिं पज्जळिअं करेसि ।

[इति तान्यपक्षिपति]

चन्द्रलेखा—[आत्मगतम्] (ग) हन्त मअणसंदावो समुद्दीविदो एदाए । [प्रकाशम्] (घ) हळा! अहीरा खु तुमं ।

कुवलयावली— (ङ) हळा! तस्स अह्माणं भट्टिणो दंसणादो पहुदि कुकूळग्गिमग्गं विअ समग्गवेअणं अप्पाणं धारेंति वि मं अहीरेत्ति कहं वाहरासि ।

क. सन्तापकारणं कदलिकागृहं सन्तापनिवारणमित्यलीकं मन्त्रयसि ।

ख. हला! प्रथमं कर्पूरेण धूपितं मदनानलमिदानीं किमिति कदलीदलानिलैः प्रज्वलितं करोषि ।

ग. हन्त! मदनसन्तापः समुद्दीपित एतस्याः । हला! अधीरा खलु त्वम् ।

घ. हला! अधीरा खलु त्वम् ।

ङ. हला! तस्यास्माकं भर्तुर्दर्शनात् प्रभृति कुकूलाग्निमग्नमिव समग्रवेदनमात्मानं धारयन्तीमपि मामधीरेति कथं व्याहरसि ।

श्रीवत्सः— (क) भो वअस्स ! किं सुदं एदं ।

नायकः— सखे ! शब्दग्राहिणा फलितमस्मत्करणेन ।

आकर्णितानि ननु कर्णरसायनानि
सख्याः पुरो निगदितान्यतिवत्सलायाः ।
एतानि तानि वचनानि मनोरमाया
भावानुबन्धपिशुनान्यपकैतवानि ॥ १२ ॥

चन्द्रलेखा— (ख) हला ! तुह अणुमदिं विणा भट्टारअं आणेदुं आसंकेमि ।

कुवलयावली— [आत्मगतम्] (ग)

कळकंठो विसकंठो होदु पवाळो वि दिग्घकरवाळो ।
चंदो वि विसणिसंदो जुळंतदहणो पडीरगिरिपवणो
[॥ १३ ॥
रइवइणा कुविदेण वि मरणादो उवरि किं णु कादव्वं ।
पिअसहि ! सिलाहणिज्जं णहि णहि ळंघेमि कण्णआ-
[समअं ॥ १४ ॥

श्रीवत्सः— (घ) साहु मणस्सिणि ! साहु ।

क. भो वयस्य ! किं श्रुतमेतत् ।

ख. हला ! तवानुमतिं विना भट्टारकमानेतुमाशङ्के ।

ग. कलकण्ठो विषकण्ठो भवतु प्रवालोऽपि दीर्घकरवालः ।
चन्द्रोऽपि विषनिष्यन्दो ज्वलद्दहनः पाटीरगिरिपवनः ॥
रतिपतिना कुपितेनापि मरणादुपरि किन्नु कर्तव्यम् ।
प्रियसखि ! श्लाघनीयं नहि नहि लङ्घयामि कन्यकासमयम् ॥

घ. साधु मनस्विनि ! साधु ।

चन्द्रलेखा—[आत्मगतम्] (क) आसासपसंगंतरेण एवं विह्मरिदवेअणं दाव करेमि । [प्रकाशम्] हळा! उह्णं उह्णेण संमइ त्ति भट्टिणो संदावेण तुह संदावो संमइ ।

कुवलयावली—(ख) हळा! भट्टिणो संदावो त्ति अळीअपिअजप्पिदेण मं आसासेसि ।

चन्द्रलेखा—(ग) हळा! सच्चं एदं । सवामि पिअसहीए ।

कुवलयावली—(घ) [सहर्षगद्‌गदम्] हळा! तुह केण आचक्खिदं ।

चन्द्रलेखा—(ङ) णं देवीहिं समं कादव्वस्स अवदीमहूसवगमणस्स अंतराएण तुह णिरूढराअस्स भट्टिणो अदक्खिण्णेण ।

श्रीवत्सः—[सहसोपसृत्य] (च) इमिणा अ पुडमं तह वणळुळाअमंसळेण दाणिं पिअवअस्सचिन्ताए एव्वं परिक्खीणेण सिरिवच्छेण बंह्मणेण ।

क. आश्वासप्रसङ्गान्तरेणैतां विस्मृतवेदनां तावत् करोमि । हला! उष्णमुष्णेन शाम्यतीति भर्तुः सन्तापेन तव सन्तापः शाम्यति ।

ख. हला! भर्तुः सन्ताप इत्यलीकप्रियजल्पितेन मामाश्वासयसि ।

ग. हला! सत्यमेतत् । शपे प्रियसख्यै ।

घ. हला! तव केनाख्यातम् ।

ङ. ननु देवीभिः समं कर्तव्यस्य भगवतीमहोत्सवगमनस्यान्तरायेण तव निरूढरागस्य भर्तुरदाक्षिण्येन ।

च. अनेन च प्रथमं तथा वनलुलायमांसलेनेदानीं प्रियवयस्यचिन्तयैवं परिक्षीणेन श्रीवत्सेन ब्राह्मणेन ।

कुवलयावली — [ससाध्वसकम्पम्] (क) अह्मो माणुसीए भणइ वाणरो वाआए ।

चन्द्रलेखा — [जनान्तिकम्] (ख) हळा! मा एव्वं भण। भट्टिणो खु पिअवअस्सो एसो । [आत्मगतम्] भट्टा वि सण्णिहिदो भवे । होदु, एव्वं दाव । [प्रकाशम्] भो दुट्ठबंह्मण! ईरिसाइं अदक्खिणाइं उपदिसंदं तुमं देवीए सण्णिहिं णइस्सं । [इति शिखायां गृह्णाति।]

श्रीवत्सः — (ग) अविहा अविहा ।

नायकः — नूनं मदुपचरणायैव संविहितमेवं विदग्धया चन्द्रलेखया । [1]तदुपसर्पामि । सखे! न भेतव्यं न भेतव्यम् ।

चन्द्रलेखा — [श्रीवत्सं विसृज्य] (घ) जेउ जेउ भट्टा ।

(कुवलयावली सशृङ्गारसाध्वसम् उत्थातुं प्रयतते ।)

नायकः — [बलादेनां निवारयन्] नहि वयमिदानीमुपचरणीयाः । किन्त्वस्माभिरेव,

---

क. अहो! मानुष्या भणति वानरो वाचा ।

ख. हला! मैवं भण । भर्तुः खलु प्रियवयस्य एषः । भर्तापि सन्निहितो भवेत् । भवतु, एवं तावत्, भोः! दुष्टब्राह्मण! ईदृशान्यदाक्षिणान्युपदिशन्तं त्वां देव्याः सन्निधिं नेष्यामि ।

ग. अविहा अविहा ।

घ. जयतु जयतु भर्ता ।

---

1. 'सत्वरमुपसर्पामि' क. पाठः.

अभिनवबिसकाण्डपेलवं
तदनु पयोधरभारभङ्गुरम् ।
तदुपरि परितापनिस्सहं
परिचरणीयमिदं तवाङ्गकम् ॥ १५ ॥

चन्द्रलेखा — (क) अकिदासणपरिग्गहे भट्टारअंमि कहं पिअसही उववसदि । ता सिणिद्धसीअळसिळेक्कदेसं णं अळंकरेदु महाराओ ।

नायकः — यदभिरुचितं प्रियवयस्यायै । [इत्युपविशति]

[कुवलयावली साङ्गसङ्कोचा सखीं सासूयमवलोकयन्ती पुनरुत्तिष्ठति ।]

नायकः — [तामुत्तरीये निगृह्य]

करभोरु! विपुलजघने!
तनुमध्ये! निम्ननाभि! निबिडकुचे! ।
कलकण्ठि! कमलवदने!
चकितचकोराक्षि! किं प्रयासेन ॥ १६ ॥

[इति पुनरपि निवेशयति]

श्रीवत्सः — [स्वगतम्] (ख) हन्त पक्खवाअउत्तिणो रण्णो सण्णिहाणे ठाउं ण जोग्गं । जेण सिट्ठबंह्मणेक्कविद्देसिणी दुट्ठदासिआ पिअसहित्ति संभाविज्जइ । किंअ ताए एव्व उवदेसो अणुचिट्ठीअदि । [इति ससम्भ्रम(मु? म)पसरति ।]

क. अकृतासनपरिग्रहे भट्टारके कथं प्रियसख्युपविशति । तद् स्निग्धशीतकशिलैकदेशं नन्वलङ्करोतु महाराजः ।

ख. हन्त! पक्षपातवर्तिनो राज्ञः सन्निधाने स्थातुं न योग्यम् । येन शिष्टब्राह्मणैकविद्वेषिणी दुष्टदासिका प्रियसखीति सम्भाव्यते । किञ्च तस्या एवोपदेश अनुष्ठीयते ।

चन्द्रलेखा—(क) तदभिप्पआहि भो सिट्ठबह्मण ! मे अक्खमेसु अविणअक्कमेसु । [इत्यनुसरति] ।

श्रीवत्सः—(ख) हंडे ! रच्छारदे ! एहिएहि । देवीए सच्चभामाए एव्व संमु(हि ? हं) आळेच्छामि । [इति शिखां मुहुर्निबघ्नन् निष्क्रान्तः]

चन्द्रलेखा—(ग) अय्य ! सिरिवच्छ ! पसीदेत्ति । [तमनु निर्गच्छति ।]

कुवलयावली—(घ) हळा ! तुमं वि किं मं परिच्चअसि । [इत्यनुयातुमुत्तिष्ठति ।]

नायकः—प्रिये कुवलयावलि !

दत्तासि घर्मकणिकाजलधारया मे
कामेन लोकगुरुणा करुणाकरेण ।
पश्यावयोरपि परस्पररागबन्धे
रागाग्निरेव भगवानयमादिसाक्षी ॥ १७ ॥

इति चिबुके मुखमुन्नमयति ।

कुवलयावली—[मुखमाकृष्य] (ङ) भो ! मा तुमं ळघूकरेहि जणेसु ।

क. तदभिप्रयाहि भो शिष्टब्राह्मण ! मेऽक्षमेष्वविनयक्रमेषु ।

ख. हण्डे ! रथ्यारते ! एह्येहि । देव्याः सत्यभामाया एव सम्मुखमालक्षयामि ।

ग. आर्य ! श्रीवत्स ! प्रसीदेति ।

घ. हला ! त्वमपि किं मां परित्यजसि ।

ङ. भो ! मा त्वं लघूकुरुष्व जनेषु ।

[ततः प्रविशति सत्यभामा चतुरिका च ।]

सत्यभामा — [ससौभाग्यगर्वम्] (क) हळा ! चउरिए !

परिअरबळेण जं जं अळं जुजं तं (त)दण्णवेसादो।

(णववेसा) सुरअंता होंति (हि) रुइअसुरआरंभा(?) ॥१८॥

चतुरिका — (ख) भट्टिणि ! ण खु सव्वापि इत्थिआ सच्चभामा ण खु सव्वो वि पुरुसो पुरुसोत्तमो ।

सत्यभामा — [सादरस्मितम्] (ग) हळा ! कदळिआघर-समीवम्मि अय्यउत्तो दिट्ठो त्ति कए आचक्खिदं ।

चतुरिका — (घ) भट्टिणि ! विळासुज्जाणपाळिआए क-ळकंठिआए ।

सत्यभामा — (ङ) हळा ! अविण्णादा पसंगंतरेण पविट्ठा अळीअरोसच्छळेण भट्टिणा केळिस्सं ।

चतुरिका — (च) इदं खु विळासुज्जाणं ।

[उभे प्रविशतः ।]

क. हला ! चतुरिके !

परिकरबलेन यद्यदलं युतं तत् तदन्यवेषात् ।

(नववेषाः) सुरतान्ता भवन्ति (हि) रुचितसुरतारम्भाः (?) ॥

ख. भट्टिनि ! न खलु सर्वापि स्त्री सत्यभामा, सर्वोऽपि पुरुषः पुरुषोत्तमः ।

ग. हला ! कदलिकागृहसमीपं आर्यपुत्रो दृष्ट इति कयाख्यातम् ।

घ. भट्टिनि ! विलासोद्यानपालिकया कलकण्ठिकया ।

ङ. हला ! अविज्ञाता प्रसङ्गान्तरेण प्रविष्टालीकरोषच्छलेन भर्त्रा क्रीडिष्यामि ।

च. इदं खलु विलासोद्यानम् ।

चतुरिका— (क) भट्टिणि! पेच्छसो अज्जस्स कए उ बळंमि तुह पदक्कमणे भट्टारआवराहे केसळकण्णुप्पळेण रइदा सिक्खा ।

सत्यभामा— [सस्मितम्] (ख) ता अपुरुवं खु कदळिआघरं ।

चतुरिका— (ग) अअं खु भट्टिणो समाळावो सुणीअदि ।

सत्यभामा— (घ) ता अणाळक्खिदा आअण्णेमि पसंगं । [तथा कृत्वा, उभे कुवलयावलीं विलोकयतः ।]

चतुरिका— (ङ) भट्टिणि! किं वि एत्थ अण्णव्व वट्टदि ।

सत्यभामा— (च) हळा! अविस्ससणिज्जो खु एसो

नायकः— [सानुनयम्]

विटपवती किसलयिनी मञ्जरिता तन्वि! तनुलता सेयम् ।
फलमिदमाकटाक्षं तत्(?) मामनुजानीहि किं विलम्बेन
[॥ १९ ॥

[इति मुखमुन्नमयति ।]

क. भट्टिनि! प्रेयस आर्यस्य कृते तु बलात् तव पदक्रमणे भट्टारकापराधे केसरकर्णोत्पलेन रचिता शिक्षा ।

ख. तदपूर्वं खलु कदलिकागृहम् ।

ग. अयं खलु भर्तुः समालापः श्रूयते ।

घ. तदनालक्षिताकर्णयामि प्रसङ्गम् ।

ङ. भट्टिनि! किमप्यत्रान्यदिव वर्तते ।

च. हला! अविश्वसनीयः खल्वेषः ।

कुवलयावली — (क) भो ! मुंच अविणअं रक्खेहि ।

सत्यभामा — [सहसोपसृत्य] (ख) भो दारिए ! कण्णआकामुअस्स इमस्स महाराअस्स अणुणअं काऊण तुमं विणअं रक्खेहि ।

नायकः — [साशङ्कं नायिकां विसृजति ।]

कुवलयावली — [सभयमपसरन्ती लतान्तरिता दिशोऽवलोकयति ।]

[प्रविश्य]

चन्द्रलेखा — [सखीमालिङ्ग्य] (ग) कित्ति तुह तणुलदा वेवइ ।

कुवलयावली — [कथञ्चिद् प्रकृतिमुपगम्य] (घ) हळा ! सच्चभामाए दिट्ठचावळह्मि ।

चन्द्रलेखा — [सशङ्कम्] (ङ) कुदो खु इअं आगदा अणब्भवज्जविट्ठी । ता एहि अब्भन्तरं गच्छामो । [इति सखीं हस्ते गृहीत्वा निष्क्रान्ता ।]

नायकः — [साञ्जलिपुटम्]

आगो नास्तीति वचो बाधितमस्तीति दासतानुचितम् ।
पापीति सिद्धसाधनमधुना देवी प्रमाणमौचित्ये ॥ २० ॥

क. भो ! मुञ्चाविनयं रक्ष ।

ख. भो दारिके ! कन्यकाकामुकस्यास्य महाराजस्यानुनयं कृत्वा त्वं विनयं रक्ष ।

ग. किमिति तव तनुलता वेपते ।

घ. हला ! सत्यभामया दृष्टचापलास्मि ।

ङ. कुतः खल्वियमागतानभ्रवज्रवृष्टिः । तदेह्यभ्यन्तरं गच्छावः ।

सत्यभामा— (क) महाराअस्स ओसरं अजाणिअ विस्संभभंगकारिणी अहं अ उइदकम्मं ण जाणामि ।

नायकः— [आत्मगतम्] हन्त श्रीवत्सोऽपि नात्र सन्निहितः ।

[प्रविश्य]

श्रीवत्सः—[सनिर्वेदम्] (ख) अह्मो मंदबुद्धिणो विम्ह-रणसीळत्तणं मज्झ । जं णतक्कि(?)किसळअत्तिदहदएण देट्ठ-ग्गुळिअवेअणा सच्चभामा जोगमाआमहूसवस्स ण गदे त्ति णो (णि)वेदिदं पिअसहस्स । सो वि मत्तो कण्णआ-विस्संभं करेइ । अहं गदुअ अप्पमोदं उवदिसामि । [परिक्रम्य, सत्यभामां विलोक्य सशङ्कम्] अह्मो विस्संभविग्घ-कारिणी सा पुडमं एव्व एत्थ सण्णिहिदा । ता इदो एव्व शणै चिट्ठामि ।

नायकः— [सत्यभामां हस्ते गृहीत्वा]

सापराधे च दण्ड्ये च पुरतो मयि तिष्ठति ।
प्रभवन्त्यपि किं रोषं विधत्से धीरमानसे! ॥ २१ ॥

क. महाराजस्यावसरमज्ञात्वा विस्रम्भभङ्गकारिण्यहं चोचितकर्म न जानामि ।

ख. अहो मन्दबुद्धेर्विस्मरणशीलत्वं मम । यद् .... किसलय-स्थितहतकेन दष्टाङ्गुलिकवेदना सत्यभामा योगमायामहोत्सवस्य न गतेति नो निवेदितं प्रियसखस्य । सोऽपि मत्तः कन्यकाविस्रम्भं करोति । अहं गत्वाप्रमोदमुपदिशामि । अहो विस्रम्भविघ्नकारिणी सा प्रथममेवात्र सन्निहिता । तदित एव शनैस्तिष्ठामि ।

अथवा श्रूयताम्—

बद्धे भ्रूयुगले विभङ्गकुटिलं बद्धोऽस्मि वेगोत्थितै-
[1]र्निःश्वासैरभिताडितेऽधरपुटे सन्ताडितोऽस्मि प्रिये ! ।
कल्हारेऽरुणया दृशा श्रुतिसखे रुद्धे निरुद्धोऽस्मि मां
जानीथास्तव दण्डितं परुषया सख्येव कोपश्रिया ॥ २२ ॥

[इति पादयोः पतितुमिच्छति ।]

सत्यभामा—[हस्तमाकृष्य सपरिजना निष्क्रान्ता ।]

नायकः— [सदैन्यनिःश्वासम्] नियतौ प्रातिकूलायां किन्नु पौरुषेण । तथाहि—

नास्वादितं तदधरामृतमन्तिकस्थं
देव्याः कृतो मनसि विप्रियवज्रलेपः ।
सेयं सपत्नजनहस्तगता च मुग्धा
कष्टं पुरः स्फुरति कल्मषकर्मपाकः ॥ २३ ॥

श्रीवत्सः— [शनैः शनैरुचि न्नुपसृत्य] (क) भो वअस्स ! जम्मणक्खत्तोपसग्गादो विमुक्क ह्म ।

नायकः— सखे ! महोत्सवप्रतिनिवृत्ता देवी प्रसङ्गमिममाकर्ण्य कियत् पीडयिष्यति तव प्रियसखीमिति पर्याकुलोऽस्मि ।

क. भो वयस्य ! जन्मनक्षत्रोपसर्गाद् विमुक्ताः स्मः ।

---

१. 'निःश्वासैरपि ताडिते' क. पाठः.

श्रीवत्सः — (क) भो वअस्स ! भवंतं भाविणं अ(णं ? णु) भवं(तेण) एव्व परिहरणिज्जेत्ति णिवेदे(दि ? मि) णो अण्णो त्ति । ता एहि सच्चभामं अणुस(रामि ? रह्म) ।

नायकः — एवमेव करणीयमिदानीम् ।

श्रीवत्सः — (ख) इदो इदो पिअवअस्सो ।

नायकः — [सस्मरणम् आकाशे लक्ष्यं बद्ध्वा] अयि ! प्रिये ! कुवलयावलि ! तथा खलु

कण्टककलिकान्वितया
तरलितया तव लताङ्गि ! तनुलतया ।
निष्कण्टकमिव मन्ये
मम राज्यं भागधेयानाम् ॥ २४ ॥

[इति सवयस्यो निष्क्रान्तः ।]

तृतीयोऽङ्कः ॥

क. भो वयस्य ! भवन्तं भाविनमनुभवतैव परिहरणीयेति निवेदयामि नान्यदिति । तदेहि सत्यभामामनुसरावः ।

ख. इत इतः प्रियवयस्यः ।

अथ चतुर्थोऽङ्कः ।

[ततः प्रविशति परिचारिकाद्वयम्]

एका — (क) हळा! कत्थूरिए! देवी जोगमाआमहूसवादो जदो पडिणिवुत्ता तदो पहुदि अकारणं वि परिअणं(?) कुप्पइ, किं काळणम् ।

कस्तूरिका — (ख) हळा घणसारिए! णं चदुरिआमुहादो देवीए पडिण्णाविदो कदळीघरंमि भट्टिणो वुत्तंतो ।

घनसारिका — (ग) जुज्जइ । अह कुवळआवळीए को वुत्तंतो ।

कस्तूरिका — (घ) सा खु महेसिणा पुणो वि तवोवणं णीदेत्ति पवादं कदुअ अह्मारिसजणस्स दुग्गमंमि सत्तच्छदपासाअसुरंगाघरअंमि ठाविदा कुळक्कमागदेण विस्सासिणा माहवकुळपरिअणेण सद्दो रक्खिज्जइ ।

क. हला! कस्तूरिके! देवी योगमायामहोत्सवाद् यतः प्रतिनिवृत्ता ततः प्रभृत्यकारणमपि परिजनाय कुप्यति, किं कारणम् ।

ख. हला! घनसारिके! ननु चतुरिकामुखाद् देव्यै प्रतिज्ञापितः कदलीगृहे भर्तुर्वृत्तान्तः ।

ग. युज्यते । अथ कुवलयावल्याः को वृत्तान्तः ।

घ. सा खलु महर्षिणा पुनरपि तपोवनं नीतेति प्रवादं कृत्वास्माऽशजनस्य दुर्गमे सप्तच्छदप्रासादसुरङ्गागृहे स्थापिता कुलक्रमागतेन विश्वासिना माधवकुलपरिजनेन सद्यो रक्ष्यते ।

घनसारिका—(क) पुरा खु एव्वंसीळा ण होइ देवी। दाणिं खु सच्चभामाए उवदेसेण दीहकोवणा अदिस्स-सीळा अ सव्वुत्ता। तह गुणदोसा अ संसग्गदो संक-मंति त्ति।

कस्तूरिका—(ख) हळा! महादेविं रुक्खिणिं ळोअम-हिळासामण्णं मण्णिअ किं एव्वं भणासि।

घनसारिका—(ग) हळा! सअळमहिळासिळाहणिज्जस्स बंधुजणविसज्जिदस्स दाक्खिण्णणिहिणो तारिसस्स कण्ण-आरअणस्स ईरिसं णिरोहं करेइ त्ति उम्मणाअमाणा एव्वं भणामि।

कस्तूरिका—(घ) किं तुमं ण आणासि कुवळआवळीए उवरि देवी एव्व णिव्विसेसं सिणेहं करेइ। किंतु दाणिं सवत्तिआजणदाक्खिण्णं दुवारिकरिअ तस्स पडिण्णासआ-

---

क. पुरा खल्वेवंशीला न भवति देवी। इदानीं खलु सत्यभामाया उपदेशेन दीर्घकोपनादृश्यशीला च संवृत्ता। तथा गुणदोषाश्च संसर्गतः सङ्क्रामन्तीति।

ख. हला! महादेवीं रुक्मिणीं लोकमहिलासामान्यं मत्वा किमेवं भणसि।

ग. हला! सकलमहिलाश्लाघनीयस्य बन्धुजनविसर्जितस्य दाक्षि-ण्यनिधेस्तादृशस्य कन्यकारत्नस्येदृशं निरोधं करोतीत्युन्मनायमानैवं भणामि।

घ. किं त्वं न जानासि कुवलयावल्या उपरि देव्येव निर्विशेषं स्नेहं करोति। किन्त्विदानीं सपत्नीजनदाक्षिण्यं द्वारीकृत्य तस्य प्रतिन्यास-

रिणो महेसिणो सा वि सज्झसेण तं कण्णअं अदिप्पआसेण ढक्केइ ।

घनसारिका—(क) हळा! जइ महेसी अणुमण्णेइ ता कुवळआवळीए मणोरहो फळिस्सदि त्ति णं तुमं जाणासि ।

कस्तूरिका—(ख) को एत्थ संसओ ।

घनसारिका — [सानुकम्पम्] (ग) सा दक्खिण्णणिही दुक्खसीळा णिव्वुदा होदु ।

कस्तूरिका—(घ) तुए सुदं भट्टिणो को णु वुत्तंतो त्ति ।

घनसारिका—(ङ) हळा जहा बब्भुमुहादो आअण्णिदं तह णिवेदेमि । [संस्कृतमाश्रित्य]

आस्ते पीठे क्षणमिव बहिर्मन्त्रिवृद्धानुरोधाद्
धत्ते हेलां परिजनवचोविक्रियासु क्रियासु ।
नेच्छत्यन्तःपुरपरिचयं राजकार्यापदेशात्
तस्याः प्रेम्णा तरळितधृतिश्चक्रवर्ती यदूनाम् ॥ १ ॥

कारिणो महर्षेः सापि साध्वसेन तां कन्यकामतिप्रयासेन छादयति ।

क. हला! यदि महर्षिरनुमन्यते तर्हि कुवलयावल्या मनोरथः फलिष्यतीति ननु त्वं जानासि ।

ख. कोऽत्र संशयः ।

ग. सा दाक्षिण्यनिधिर्दुःखशीला निर्वृता भवतु ।

घ. त्वया श्रुतं भर्तुः को नु वृत्तान्त इति ।

ङ. हला! यथा बभ्रुमुखादाकर्णितं तथा निवेदयामि ।

कस्तूरिका — [हस्तमुरसि कृत्वा] (क) अहो बलिअं खु पेम्मबंधो भट्टारअस्स ।

* [विलोक्य] (ख) हळा ! एसो खु अंतेउरपरिअणो इदो तदो णिळीअ णिक्कंपो होइ । ता देविं उवच्छंदेदुं आअदो भट्टेत्ति आसंकेमि ।

कस्तूरिका — (ग) ता एहि देवीसमीवं गच्छामो ।

[इति निष्क्रान्ते ।]

[प्रवेशकः ।]

[ततः प्रविशति नायको विदूषकश्च ।]

नायकः — [सानुरागनिर्वेदम् ।]

अद्य श्वो भविता समागम इति प्रेमोत्तरं ताम्यतो-
रत्यन्ते विजने कुतश्चन मुहुर्विश्लिष्यतोर्भ्रमतः ।
वैक्लव्यं वहतोः सुहृज्जनसमाश्वासैकजीवाशयो-
र्यूनोर्नूनमियं मनोरथमयी माया महायासिका ॥ २ ॥

श्रीवत्सः — (घ) भो वअस्स कत्थूरिआए णासे वि णाहिचम्म ण मुंचेसि । जं णारएण णीदाए कुवळआवळीए तुह चित्तस्य उक्कंठभरो तारिसो एव्व ।

क. अहो बलवान् खलु प्रेमबन्धो भट्टारकस्य ।

ख. हला ! एष खल्वन्तःपुरपरिजन इतस्ततो निलीय निष्कम्पो भवति । तद् देवीमुपच्छन्दयितुमागतो भर्तेत्याशङ्के ।

ग. तदेहि देवीसमीपं गच्छावः ।

घ. भो वयस्य ! कस्तूरिकाया नाशेऽपि नाभिचर्म न मुञ्चसि । यद् नारदेन नीतायां कुवलयावल्यां तव चित्तस्योत्कण्ठाभरस्तादृश एव ।

---

* इदं वनसारिकाया वचनं प्रतिभाति ।

नायकः—[अश्रुतिमभिनीय]

सलीले धम्मिल्ले दरदलितकल्हारकलिकां
कपोले सोत्कम्पं मृगमदमयीं पत्रलतिकाम्।
कुचाभोगे कुर्वन् ललितमकरीं कुङ्कुममयीं
कदा नु क्रीडेयं चकितहरिणीचञ्चलदृशा ॥ ३ ॥

श्रीवत्सः—(क) भो वअस्स! अज्ज एव्व खु सो ताव-सदुद्दुरूटो तं कण्णअं घेत्तूण तपोवणं पविट्ठो। ता एहि सिग्घजवमहाजंघवाहेण रहेण तं अणुसरामो।

नायकः—[सनिःश्वासम्] किमनुसृत्य करणीयमस्माभिः।

श्रीवत्सः—[ससंरम्भम्] (ख) अहं तेण दंडादंडि बाहाबाहवि अ जुज्झस्सं। बह्मणभीरुओ तुमं तं कण्णअं जअसिरिं विअ संदणे ठाविऊण दुवारवदिं आअच्छेहि।

नायकः—सखे! नूनमिहागतो भ(ग)वान् मामदृष्ट्वाभिवर्तते इति तदिदं प्रवादमात्रमेवेति तर्कयामि।

श्रीवत्सः—(ग) णणु देवीए वसं गदाणं सव्वं वि विदिदं होदि।

[इत्युभौ परिक्रामतः।]

[नेपथ्ये कलकलः।]

क. भो वयस्य! अद्यैव खलु स तापसदुर्दुरूटस्तां कन्यकां गृहीत्वा तपोवनं प्रविष्टः। तदेहि शीघ्रजवमहाजङ्घवाहेन रथेन तमनुसरावः।

ख. अहं तेन दण्डादण्डि बाहूबाहवि च योत्स्ये। ब्राह्मणभीरुस्त्वं तां कन्यकां जयश्रियमिव स्यन्दने स्थापयित्वा द्वारवतीमागच्छ।

ग. ननु देव्या वशं गतानां सर्वमपि विदितं भवति।

श्रीवत्सः—(क) भो तुवरेहि तुवरेहि। जं णारअसिस्सवग्गो तुमं अक्कंदइ, तदो तं बह्मणं घाइऊण को वि रक्खसो कुवळआवळिं अवहरिस्सदि त्ति तक्केमि।

नायकः— विह्वलो भयपरिभ्रान्तबुद्धिरालपस्यसम्बद्धम्। ननु सप्तच्छदप्रासादपरिसरे खल्वयं परिजनस्याक्रन्दः। तदेहि किन्निमित्त इत्यवबोधयामः।

[ततः प्रविशति परिभ्रान्तपरिजना विषण्णा रुक्मिणी]

रुक्मिणी— [सनिर्वेदम्] (ख) हळा सुगंधिए! अप्पणो उवेक्खादो साधुबंदीकआए कुवळआवळीए हंत रुक्किणी परि(णअ ? अण)घादिणी णिस्संसअत्ति ळोअवादे णिमग्गंमि। ता कळंकपंकिळेण किं अप्पणो जीविदेण। विण्णवेहि अप्पणो ववसाअं अय्यउत्तस्स।

सुगन्धिका—(ग) भट्टिणि! अक्खत्तिएव्व किं अहीरा होसि। जं गरुआणुराअणिच्चळेहिं ळोअणेहिं पुळोअन्तं भट्टारअं इदो आअच्छंतं ण पेच्छसि।

क. भो त्वरस्व त्वरस्व। यन्नारदशिष्यवर्गस्त्वामाक्रन्दति, ततस्तं ब्राह्मणं हत्वा कोऽपि राक्षसः कुवलयावलीमपहरिष्यतीति तर्कयामि।

ख. हला सुगन्धिके! आत्मन उपेक्षातः साधुबन्दीकृतया कुवलयावल्या हन्त रुक्मिणी परिजनघातिनी निस्संशयमिति लोकवादे निमग्नास्मि। तत् कलङ्कपङ्किलेन किमात्मनो जीवितेन। विज्ञापयात्मनो व्यवसायमार्यपुत्रस्य।

ग. भट्टिनि! अक्षत्रियेव किमधीरा भवसि। यद् गुरुकानुरागनिश्चलाभ्यां लोचनाभ्यां पश्यन्तं भट्टारकमित आगच्छन्तं न पश्यसि।

रुक्मिणी— [विलोक्य सगद्गदम्] (क) अय्यउत्त! परित्ताएहि परित्ताएहि।

नायकः—[सादरमुपसृत्य] अयि विदर्भराजनन्दने! महादेवि!

मयि त्रातरि पातालभूतलस्वर्गवासिनाम्।
तवाज्ञाकरतां प्राप्ते कुतस्ते भीतिरागता॥ ४॥

[रुक्मिणी व्याहर्तुमिच्छति। व्रीडावैलक्षण्यमभिनीय सखीमवलोकयति।]

सुगन्धिका— (ख) भट्टारअ! सत्तच्छदप्पासादअळिंदे कुवळआवळी केण वि अणाळेक्खिदेण गेह्विदेत्ति वाउळा देवी।

नायकः—भो प्रिये! किमेतावतापि परिभ्रान्तासि। सेयं कन्यका तव समीप इति चेतसि समाधीयतामाश्वासः।

[नेपथ्ये]

भो भो द्वारवतीवासिभिर्वीरम्मन्यैः पुरुषपलालैः श्रूयतामयं कालयवनसोदरस्य मे वीरस्यालापः—

अम्भोजिनीमिव मदावलदन्तलग्नां
मद्बाहुपञ्जरगतां मदिरायताक्षीम्।
यस्त्रातुमिच्छति मदेन यदोः प्रसूतौ
सोऽयं समेतु यदि वा सकलाः समेताः॥ ५॥

नायकः—अहो गर्वग्रन्थिबन्धुरं वचनमनात्मवेदिनः कालपाशवशवर्तिनो दानवस्य।

क. आर्यपुत्र! परित्रायस्व परित्रायस्व।

ख. भट्टारक! सप्तच्छदप्रासादालिन्दे कुवलयावली केनाप्यनालक्षितेन गृहीतेति व्याकुला देवी।

श्रीवत्सः— (क) भो पिअवअस्सस्स देवीसंरक्खणे अहं सज्जिदो होमि । तुमं माआविरक्खसं अप्पमत्तो वावादेहि ।

रुक्मिणी — (ख) हळा ! गच्छ तुमं अय्यसच्चव(माहा ? म्मा)णं णिवेदेदुं अय्यउत्तस्य ववसाअं ।

नायकः— अयि प्रिये ! किं न वीरसमरसमयज्ञासि । यदेकाकिनि विरोधिनि यदुवीरसन्नाहमादिशासि । पश्य

सिद्धार्थखण्डनविधौ कति वज्रधारा
योऽज्या भवन्ति परिकूटितशैलकूटाः ।
चण्डाः पतन्ति कति वा करिकुम्भकूट-
पाटच्चरा हरिपतेर्मशके चपेटाः ॥ ६ ॥

[इति ससंरम्भं परिक्रामन् सुदर्शनानुध्यानपरिग्रहणप्रयोगानभिनीय साशङ्कमवलोकयन्]

चक्रं विलोक्य चटुलाशनिघोरधारं
खड्गं दधाति सहखेटमसौ निशाटः ।

[सशङ्काविषादम्]

अस्यांसतो विकटवल्लवने सिताङ्गी
हा हन्त हन्त पततीयमराळकेशी ॥ ७ ॥

क. भो प्रियवयस्यस्य देवीसंरक्षणेऽहं सज्जो भवामि । त्वं मायाविराक्षसमप्रमत्तो व्यापादय ।

ख. हला ! गच्छ त्वमार्यसत्यवर्माणं निवेदयितुमार्यपुत्रस्य व्यवसायम् ।

तदेनां गगनभाग एव समालम्ब्य विह्वलां तरळतनुतरतरङ्गशीकरशिशिरगन्धवाहे विलासवनदीर्घिकातटे मन्दमवतारयामि । [इति निष्क्रान्तः ।]

रुक्मिणी — (क) अय्य! सिरिवच्छ! माआविणो दाणवा। एआई गदो अय्यउत्तो। ण आणामि किण्णु सोदव्वं त्ति ।

श्रीवत्सः — (ख) देवि! सोहणं एव्व सुणीअदि ।

[प्रविश्य नारदः]

नारदः — [सहर्षम्]

आह्वापरोदयमुपोषितयोर्ममाक्ष्णो-
रस्मिन् महीमवतरत्यधुना मुकुन्दे ।
आश्चर्यदायिरणदश्च न पारणानां
प्राप्तैरजीर्णिरजनिष्ट जनिष्यते च ॥ ८ ॥

[विलोक्य] इमामेव पुरस्कृत्य शेषं सम्पादयामि । [उपसृत्य] महादेवि! वर्धसे पत्युर्विजयेन । श्रूयताम् —

सुराः सप्ताब्धिपूराभं य(दै?भै)क्षन्त महोदरम् ।
चक्रधाराग्निना सर्पिर्बिन्दुशोषं स शोषितः ॥ ९ ॥

रुक्मिणी — [ससम्भ्रमहर्षं नारदस्य पादयोः प्रणम्य] (ग) भअवदो पसादेण उज्जीविदह्मि ।

क. आर्य! श्रीवत्स! मायाविनो दानवाः । एकाकी गत आर्यपुत्रः । न जानामि किन्नु श्रोतव्यमिति ।

ख. देवि! शोभनम् एव श्रूयते ।

ग. भगवतः प्रसादेनोज्जीवितास्मि ।

श्रीवत्सः — [स्वोत्तरीयं वीजयन्] (क) ही ही णिज्जिदं पिअवअस्सेण । फळिदं अह्माणं भाअहेएण [इति नर्तित्वा सविनयम्] भअवं! सिरिवच्छो सअण्णपंसं दुवे वारे तुज्झ सिरिचरणे अहिवादेइ ।

नारदः — [सस्मितम्] एवमेव मुदितो भूयाः ।

रुक्मिणी — (ख) भअवं किं अक्खदसरीरा वा मे वच्छा कुवळआवळी ।

नारदः — देवि! यस्यामेवं तवादरो निसर्गसिद्धस्तस्याः किमुच्यते कुशलसम्पात्तिः ।

रुक्मिणी — (ग) दाणिं खु मे पुण्णं संपुण्णं । [परिजनं विलोक्य] तुह्मे गच्छह अय्यउत्तस्स मंगळणीराअण-संपादणस्स ।

परिजनः — (घ) तहे त्ति । [निष्क्रान्तः ।]

सुगन्धिका — (ङ) भअवं दाणिं कहिं भट्टा ।

नारदः — अयं खलु विह्वलां कुवलयावलीमाश्वासयन् दीर्घिकातटे तिष्ठति ।

क. ही!! ही!! निर्जितं प्रियवयस्येन । फलितमस्माकं भागधेयेन भगवन्! श्रीवत्सः सकर्णस्पर्शं द्वे वारे तव श्रीचरणावभिवादयति ।

ख. भगवन्! किमक्षतशरीरा वा मे वत्सा कुवलयावली ।

ग. इदानीं खलु मे पुण्यं सम्पूर्णम् । यूयं गच्छतार्यपुत्रस्य मङ्गल-नीराजनसम्पादनाय ।

घ. तथेति ।

ङ. भगवन्! इदानीं कुत्र भर्ता ।

सुगन्धिका — (क) भअवं! किं एत्थ गच्छामो।

नारदः — यदभिरुचितं महादेव्यै। [परिक्रामति।]

नारदः — [आत्मगतम्] अयमेवावसरो देव्यै दिव्यस्यास्य निवेदनाय। [प्रकाशम्] पुत्रि वैदर्भि! किमपि निवेदयितुमिच्छामि।

रुक्मिणी — (ख) भअवं आणवेहि।

नारदः — [जनान्तिकम्]

जानासि लक्ष्मि! भगवच्चरणारविन्द-
सेवासखीं वसुमतीं भगिनीं पुरा ते।
सैवाधुना त्वमिव देवहिताय धात्रा
सम्प्रार्थिता कुवलयावलिराविरासीत्॥ १०॥

रुक्मिणी — [आत्मगतम्] (ग) किण्णु एत्थ भअवदो जुत्तं उत्तरं होदु। [प्रकाशम्] हळा! तुमं णिवेदेहि सच्चवादिणीणं भइणिआणं। जं महोवआरिणो अय्यउत्तस्स कंठे वि उवआरं पडिअरेमि। एत्थ तुह्मेहिं अणुमदी कादव्वेत्ति।

सुगन्धिका — (घ) जं देवी आणवेदि त्ति। [निष्क्रान्ता।]

क. भगवन्! किमत्र गच्छामः।

ख. भगवन्! आज्ञापय।

ग. किन्वत्र भगवतो युक्तमुत्तरं भवतु। हला! त्वं निवेदय सत्यवादिनीनां भगिनिकानाम्। यन्महोपकारिण आर्यपुत्रस्य कण्ठेऽपि उपहारं प्रतिकरोमि। अत्र युष्माभिरनुमतिः कर्तव्येति।

घ. यद् देव्याज्ञापयतीति।

नारदः — साधु कल्याणशीले! साधु ।

कृतोपकारेषु जनेषु देहिना-
मकुर्वतां प्रत्युपकारमादरात् ।
किमिन्द्रसम्पत्तिविशेषया श्रिया
किमायुषा कल्पशतानुवर्तिना ॥ ११ ॥

[ततः प्रविशति विह्वला कुवलयावली निषण्णो नायकश्च ।]

नायकः — कथमिदानीमपि न समाश्वसिति मे प्राणवल्लभा । तदेनां कमलदलानीतशिशिरजलसेचनेन समाश्वासयामि । [इति किञ्चिदन्तरं परिक्रामति । समाकर्ण्य सहर्षम् ।] हन्तेयं स्वयमेव समाश्वस्ता किमपि मन्त्रयते । तदनालक्षितोऽहमाकर्णयामि । [तथा करोति ।]

कुवलयावली — (क) [परितो विलोक्य] अह्मो इदं तं एव्व उज्जाणं । [विचिन्त्य] जाव को वि अण्णो ण पेक्खइ ताव इमाए दिग्घिआए णिमज्जिऊण अप्पाणं वावादेमि । [इति शनैरुत्थाय दीर्घिकामुपसरति ।]

नायकः —

परस्परानुरागाय वासनास्थायिने नमः ।
यस्मिन् प्राणपरित्यागदशाप्युल्लासकारिणी ॥ १२ ॥

[इत्यनुपरिक्रामति ।]

क. इदं तदेवोद्यानम् । यावत् कोऽप्यन्यो न पश्यति तावदस्यां दीर्घिकायां निमज्ज्यात्मानं व्यापादयामि ।

श्रीवत्सः — (क) इदं खु उज्जाणं । पविसन्तु भवंतो ।

[सर्वे प्रवेशं नाटयन्ति ।]

कुवलयावली — [साञ्जलिबन्धम्]

(ख) अयि दिग्घिए णमो दे
पसीद परिगह्ण जीविदं एदं ।
जइ मज्झ आउसेसो
सो राआ तेण णिव्वुदो होदु ॥ १३ ॥

(इति प्रवेष्टुमिच्छति ।)

नायकः — [तां हस्ते गृहीत्वा]

अयि! त्वमेवंव्यवसायिनी प्रिये!
किमायुषा मे भवता चिरादपि ।
किमिन्दुना ध्वंसितचन्द्रिकाश्रिया
किमिन्द्रनीलेन विसृष्टकान्तिना ॥ १४ ॥

किञ्च,

निर्विश्लेषरथाङ्गमम्बरगतावर्तं सरोजे सितं (?)
निर्निद्रं करुणामृतं सुरभिशैवालं त्वदङ्गं सरः ।
गाहित्वा पुटपाकमाकलयते पश्यैतदस्मन्मन-
स्तद् दीर्घाक्षि! न दीर्घिकानिपतनं सन्तापनिर्वापणम् ॥

क. इदं खलूद्यानम् । प्रविशन्तु भवन्तः ।

ख. अयि दीर्घिके! नमस्ते
प्रसीद परिगृहाण जीवितमेतत् ।
यदि ममायुःशेषः
स राजा तेन निर्वृतो भवतु ॥

कुवलयावली — [नायकं विलोक्य सहर्षलज्जासम्भ्रमम् । आत्मगतम्] (क) हन्त इमस्सिं ओ(नवे ? सरे) महाभाओ एसो दिट्ठो । [प्रकाशम्] भो मुंच मं । एव्वंकआविणआ देवीआ मुहं पेक्खिदुं ण सक्कुणोमि ।

नायकः — यदि प्रिये तवायं निश्चयः

निवार्यते ततस्तस्मिन् साहसं चारुहासिनि ! ।
मार्गप्रदर्शकं मन्ये मामेनं मानशालिनि ! ॥ १६ ॥

ततः खलु

ताम्रोदरेण तरुणाङ्गुलिपल्लवेन
वामेन ते करतलेन करं मदीयम् ।
आलम्ब्य वाथ पुनरुक्तिजितारविन्दौ
मन्दं निधेहि चरणौ मणिकुट्टिमेषु ॥ १७ ॥

[इति दत्तहस्तः पुरस्तिष्ठति ।]

कुवलयावली — [हस्तमाकृष्य] (ख) संतं पापं संतं पापं । पडिहदं अमंगळं पडिहदं अमंगळं । [इति परिवृत्य तिष्ठति ।]

नायकः — [साकूतम्] प्रिये ! दीर्घिकायामिदमेकमवलोक्यताम् ।

आचर्वणेन विरळीकृतकाण्डबन्धं
चञ्चूपुटे सहचरेण कृतं मृणाळम् ।

क. हन्त ! अस्मिन्नवसरे महाभाग एष दृष्टः । भो मुञ्च माम् एवंकृताविनया देव्या मुखं प्रेक्षितुं न शक्नोमि ।

ख. शान्तं पापं शान्तं पापम् । प्रतिहतममङ्गलं प्रतिहतममङ्गलम् ।

हातुं ग्रहीतुमपि नेच्छति चक्रवाकी
दत्तं मयाधरमिव त्वमधीरनेत्रे! ॥ १८ ॥

कुवलयावली — (क) सो वि एको धुत्तो ।

नायकः— प्रिये! किमहमपरो धूर्तः ।

श्रीवत्सः— [सोच्चैःस्वरम्] (ख) इदो इदो देवी ।

नायकः— [समाकर्ण्य आत्मगतम्] कथं वयस्यो निवेदयति संज्ञया देवीसमागमनम् । [प्रकाशम्] कोऽत्र भोः निवेद्यतां प्रत्याहृता कुवलयावलीति ।

देवी— [उपसृत्य सहर्षम्] (ग) जेउ जेउ अय्यउत्तो ।

नायकः— [सादरम्] महादेवि! त्वदादेशादियं मया प्रत्याहृता दारिका ।

रुक्मिणी— [लज्जमानां कुवलयावलीमालिङ्गय] (घ) भइणिए! तुए दुईआ अक्खदसरीराए लोअवादादो विमुक्क ह्मि ।

नायकः— कथमत्रैव भगवान् नारदः । भगवन्! अभिवादये ।

नारदः— [सहर्षातिरेकम्]

स्वस्ति श्रीवासुदेवाय स्वस्ति दानवघातिने ।
स्वस्ति मङ्गलमूलाय स्वस्ति कारुण्यशालिने ॥ १९ ॥

क. सोऽप्येको धूर्तः ।

ख. इत इतो देवी ।

ग. जयतु जयत्वार्यपुत्रः ।

घ. भगिनिके! त्वया द्वितीया अक्षतशरीरया लोकवादाद् विमुक्तास्मि ।

श्रीवत्सः— (क) वड्ढदि पिअवअस्सो देवीए चित्त-समाराहणेण ।

नायकः— [सस्मितम्] कथं प्रियवयस्यः ।

रुक्मिणी— (ख) भइणिए ! वंदेहि भअवंतं ।

कुवलयावली— [विलोक्य] (ग) हंत सो एसो भअवं तादणारदो ।

[प्रणम्याश्रु विमुञ्चति ।]

नारदः— पुत्रि ! जगत्कण्टकोद्धरणहेतुतया लोकोपकारिणीं त्वां विलोक्य कृतार्थोऽस्मि ।

[प्रविश्य]

सुगन्धिका— (घ) देवि ! सअलो वि भट्टिणीजणो विण्णवेदि। अज्जाए कज्जसमाळोअणेण संतेसिद म्हि । जह महादेवीए रोअदि तह करीअदु त्ति ।

रुक्मिणी— [जनान्तिकम्] (ङ) भअवं ! समप्पेमि कुवळआवळिं अय्यउत्तस्स ।

नारदः— त्वमस्याः प्रभवसीति पुरैव निवेदितमस्माभिः ।

क. वर्धते प्रियवयस्यो देव्याश्चित्तसमाराधनेन ।

ख. भगिनिके ! वन्दस्व भगवन्तम् ।

ग. हन्त ! स एष भगवान् तातनारदः ।

घ. देवि ! सकलोऽपि भट्टिनीजनो विज्ञापयति — आर्याया: कार्यसमालोचनेन संतोषितोऽस्मि । यथा महादेव्यै रोचते तथा क्रियतामिति ।

ङ. भगवन् ! समर्पयामि कुवलयावलीमार्यपुत्रस्य ।

रुक्मिणी—(क) अज्जउत्त! जइ अहं तुज्झ माण-णिज्जा ता इअं तुए अह्माणिव्विसेसं दट्ठव्वा। [इति नायिकाहस्तं नायकस्य हस्ते समर्पयति।]

नायकः—

हन्त सममेव निहिते कुवलयदृशा कराम्बुजे प्रिययोः।
घनसारगन्धसारौ मिळिताविव तापमपनयतः॥ २०॥

नारदः—[सबहुमानम्] देव! निखिलश्रेयोनिदानमविचारेण करणीयो देव्या निदेशः।

नायकः—यदादिशति भगवान्। [इति कुवलयावल्याः करं गृह्णाति]

[सर्वे हर्षं नाटयन्ति।]

श्रीवत्सः—(ख) सुळग्गं होदु।

नारदः—तदेतदेकयैव त्वया निर्व्यूढं यदुपदिष्टमस्माभिः।

व्रतानि वर्णनीयानि सन्त्वन्यानि सहस्रशः।
परं व्रतं पुरन्ध्रीणां पतिच्चित्तानुरञ्जनम्॥ २१॥

इति।

[आकाशे दुन्दुभिध्वनिः।]

नारदः—देव! भवतः कुवलयावलीकल्याणमभिनन्दतां देवानामयमानन्दविलासः।

क. आर्यपुत्र! यद्यहं तव माननीया तहींयं त्वयास्मन्निर्विशेषं द्रष्टव्या।

ख. सुलग्नं भवतु।

नायकः— [सप्रश्रयं नारदं प्रणम्य] भगवन्! त्वत्प्रसादेन देवीप्रसादेन च कति कति वा श्रेयांसि न मामनुबध्नन्ति । [सहर्षोत्कर्षम्]

रम्या वागिव सुप्रसादमधुरा देवीमणी रुक्मिणी
सन्मानार्थ इवात्युदारगरिमा स त्वं परिद्योतसे ।
कन्येयं करवल्लरीव विलसत्यन्योन्यमैत्रीक्रमो
युष्माकं भुवि मादृशान् सहृदयानानन्दयन्नेधताम् ॥ २२ ॥

नारदः— किं ते भूयः प्रियं करोमि ।

नायकः—

गाढं मानमपास्य मे हितकरः सर्वोऽपि देवीगणः
कन्यारत्नमिदं मनोहरगुणे देवीपदे स्थापितम् ।
कर्तव्येषु हिताहितेषु भगवान् प्रीत्या प्रशास्त्यन्वहं
तत् पूर्णानि ममेप्सितानि हि भवद्भूते भविष्यन्ति च ॥२३॥

तथाचेदमस्तु भरतवाक्यम्—

कल्याणमस्तु जगतां सततं त्रयाणां
संवर्धितो भवतु वैदिक एव मार्गः ।
सारस्वतानि सरसानि कवीश्वराणां
मात्सर्यदिग्धहृदया न कलङ्कयन्तु ॥ २४ ॥

[इति निष्क्रान्ताः सर्वे ।]

चतुर्थोऽङ्कः ॥

पूर्णेयं शिङ्गभूपेन ग्रथिता मधुजल्पितैः ।
रत्नपाञ्चालिका नाम नाटिका रसपेटिका ॥

शुभं भूयात् ॥

LIST OF SANSKRIT PUBLICATIONS FOR SALE.

		RS.	AS.	P
भक्तिमञ्जरी **Bhaktimanjari** (Stuti) by H. H. Svāti Śrī Rāma Varma Mahārāja.		1	0	0
स्यानन्दूरपुरवर्णनप्रबन्धः **Syanandurapuravarnana-prabandha** (Kāvya) by H. H. Svāti Śrī Rāma Varma Mahārāja, with the commentary Sundarī of Rājarāja Varma Koil Tampurān.		2	0	0

Trivandrum Sanskrit Series.

		RS.	AS.	P
No. 1	दैवम् **Daiva** (Vyākaraṇa) by Deva with Puruṣakāra of Kṛṣṇalīlāśukamuni (*out of stock*).	1	0	0
No. 2	अभिनवकौस्तुभमाला-दक्षिणामूर्त्तिस्तवौ **Abhinavakaustubhamala and Daksinamurtistava** by Kṛṣṇalīlāśukamuni (*out of stock*).	0	2	0
No. 3	नलाभ्युदयः **Nalabhyudaya** (Kāvya) by Vāmana Bhaṭṭa Bāṇa (*second edition*).	0	4	0
No. 4	शिवलीलार्णवः **Sivalilarnava** (Kāvya) by Nīlakaṇṭa Dīkṣita (*out of stock*).	2	0	0
No. 5	व्यक्तिविवेकः **Vyaktiviveka** (Alaṅkāra) by Mahima-Bhaṭṭa with commentary (*out of stock*).	2	12	0
No. 6	दुर्घटवृत्तिः **Durghatavrtti** (Vyākaraṇa) by Śaraṇadeva (*out of stock*).	2	0	0
No. 7	ब्रह्मतत्त्वप्रकाशिका **Brahmatattvaprakasika** (Vedānta) by Sadāśivendrasarasvatī (*out of stock*).	2	4	0
No. 8	प्रद्युम्नाभ्युदयम् **Pradyumnabhyudaya** (Nāṭaka) by Ravi Varma Bhūpa (*out of stock*).	1	0	0

	RS.	AS.	P.
No. 9—विरूपाक्षपञ्चाशिका **Virupaksapancasika** (Vedānta) by Virūpākṣanātha with the commentary of Vidyācakravartin (*out of stock*).	0	8	0
No. 10—मातङ्गलीला **Matangalila** (Gajalakṣaṇa) by Nīlakaṇṭha (*out of stock*).	0	8	0
No. 11—तपतीसंवरणम् **Tapatisamvarana** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).	2	4	0
No. 12—परमार्थसारम् **Paramarthasara** (Vedānta) by Ādiśeṣa with the commentary of Rāghavānanda (*out of stock*).	0	8	0
No. 13—सुभद्राधनञ्जयम् **Subhadradhananjaya** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).	2	0	0
No. 14—नीतिसारः **Nitisara** (Nīti) by Kāmandaka, with the commentary of Śankarārya (*out of stock*).	3	8	0
No. 15—स्वप्नवासवदत्तम् **Svapnavasavadatta** (Nāṭaka) by Bhāsa (*second edition*).	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् **Pratijnayaugandharayana** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 17—पञ्चरात्रम् **Pancaratra** (Nāṭaka) by Bhāsa (*out of stock*).	1	0	0
No. 18—नारायणीयम् **Narayaniya** (Stuti) by Nārāyaṇa Bhaṭṭa with the commentary of Deśamangalavārya (*second edition*).	4	0	0
No. 19—मानमेयोदयः **Manameyodaya** (Mīmāmsā) by Nārāyaṇa Bhaṭṭa and Nārāyaṇa Paṇḍita (*out of stock*).	1	4	0
No. 20—अविमारकम् **Avimaraka** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 21—बालचरितम् **Balacarita** (Nāṭaka) by Bhāsa (*out of stock*)	1	0	0

	RS.	AS.	P.
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि **Madhyamavyayoga-Dutavakya-Dutaghatotkaca-Karnabhara and Urubhanga** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 23—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part I, 1st and 2nd Kāṇḍas). (*out of stock*).	1	12	0
No. 24—जानकीपरिणयः **Janakiparinaya** (Kāvya) by Cakra Kavi (*out of stock*).	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका **Kanadasiddhantacandrika** (Nyāya) by Gaṅgādharasūri (*out of stock*).	0	12	0
No. 26—अभिषेकनाटकम् **Abhisekanataka** by Bhāsa (*out of stock*).	0	12	0
No. 27—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kāḷidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part I, 1st and 2nd Sargas) (*out of stock*).	1	12	0
No. 28—वैखानसधर्मप्रश्नः **Vaikhanaśadharmaprasna** (Dharmasūtra) by Vikhanas (*out of stock*).	0	8	0
No. 29—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part II, 3rd Kāṇḍa) (*out of stock*).	2	4	0
No. 30—वास्तुविद्या **Vastuvidya** (Śilpa) (*out of stock*).	0	12	0
No. 31—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part III, 4th, 5th and 6th Kāṇḍas).	1	0	0
No. 32—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part II, 3rd, 4th and 5th Sargas) (*out of stock*)	2	8	0

	RS.	AS.	P.
No. 33—वाररुचसंग्रहः **Vararucasangraha** (Vyākaraṇa) with the commentary Dīpaprabhā of Nārāyaṇa (*out of stock*).	0	8	0
No. 34—मणिदर्पणः **Manidarpana** (Nyāya) by Rājacūḍāmaṇimakhin.	1	4	0
No. 35—मणिसारः **Manisara** (Nyāya) by Gopīnātha.	1	8	0
No. 36—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kāḷidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part III, 6th, 7th and 8th Sargas).	3	0	0
No. 37—आशौचाष्टकम् **Asaucastaka** (Smṛti) by Vararuci with commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the commentary Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part I, 1st Kāṇḍa).	2	0	0
No. 39—चारुदत्तम् **Carudatta** (Nāṭaka) by Bhāsa (*out of stock*).	0	12	0
No. 40—अलङ्कारसूत्रम् **Alankarasutra** by Rājānaka Ruyyaka with the Alaṅkārasarvasva of Mankhūka and its commentary by Samudrabandha (*second edition*).	2	8	0
No. 41—अध्यात्मपटलम् **Adhyatmapatala** (Vedānta) by Āpastamba with Vivaraṇa of Śrī Śaṅkara-Bhagavat-Pāda (*out of stock*).	0	4	0
No. 42—प्रतिमानाटकम् **Pratimanataka** by Bhāsa (*second edition*).	1	8	0
No. 43—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghāṭana of Kṣīrasvāmin and Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part II, 2nd Kanda, 1-6 vargas).	2	8	0
No. 44—तन्त्रशुद्धम् **Tantrasuddha** by Bhaṭṭāraka Vedottama (*out of stock*).	0	4	0

	RS.	AS.	P.
No. 45—प्रपञ्चहृदयम् **Prapancahrdaya.**	1	0	0
No. 46—परिभाषावृत्तिः **Paribhasavrtti** (Vyākaraṇa) by Nīlakaṇṭa Dīkṣita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedānta) by Kṛṣṇānanda Sarasvatī (Part I.)	1	12	
No. 48—सिद्धान्तसिद्धाञ्जनम् Do. Do. (Part II).	2	0	0
No. 49—गोलदीपिका **Goladipika** (Jyotiṣa) by Parameśvara.	0	4	0
No. 50—रसार्णवसुधाकरः **Rasarnavasudhakara** (Alaṅkâra) by Siṅga Bhūpāla.	3	0	0
No. 51—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghāṭana of Kṣīrasvāmin and Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part III, 2nd Kanda, 7-10 vargas).	2	0	0
No. 52—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghaṭîya Sarvânanda (Part IV, 3rd Kâṇḍa).	1	8	0
No. 53—शब्दनिर्णयः **Sabdanirnaya** (Vedânta) by Prakâśâtmayatîndra.	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः **Sphotasiddhi-nyayavicara** (Vyâkaraṇa).	0	4	0
No. 55—मत्तविलासप्रहसनम् **Mattavilasaprahasana** (Nâṭaka) by Mahendravikrama-varman. (*out of stock*).	0	8	0
No. 56—मनुष्यालयचन्द्रिका **Manusyalayaca-ndrika** (Śilpa) (*out of stock*).	0	8	0
No. 57—रघुवीरचरितम् **Raghuviracarita** (Kâvya).	1	4	0
No. 58—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedānta) by Kṛṣṇānanda Sarasvatî (Part III).	2	0	0

	RS.	AS.	P.
No. 59—नागानन्दम् **Nagananda** (Nâṭaka) by Harṣadeva with the commentary Vimarśinī of Śivarâma (*out of stock*).	3	4	0
No. 60—लघुस्तुतिः **Laghustuti** by Laghubhaṭṭâraka with the commentary of Râghavânanda.	0	8	0
No. 61—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedânta) by Kṛṣṇânanda Sarasvatī (Part IV).	1	4	0
No. 62—सर्वमतसंग्रहः **Sarvamatasangraha.** (*out of stock*).	0	8	0
No. 63—किरातार्जुनीयम् **Kiratarjuniya** (Kâvya) by Bhâravî with the commentary Śabdârthadīpika of Citrabhânu (1, 2 and 3 Sargas).	2	8	0
No. 64—मेघसन्देशः **Meghasandesa** by Kâlidāsa with the commentary Pradīpa of Dakṣiṇâvartanâtha.	0	12	0
No. 65—मयमतम् **Mayamata** (Śilpa) by Mayamuni (*out of stock*).	3	4	0
No. 66—महार्थमञ्जरी **Maharthamanjari** (Darśana) with the commentary Parimala of Maheśvarânanda.	2	4	0
No. 67—तन्त्रसमुच्चयः **Tantrasamuccaya** (Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śaṅkara (Part I, 1–6 Paṭalās) (*out of stock*).	3	4	0
No. 68—तत्त्वप्रकाशः **Tattvaprakasa** (Āgama) by Śrī Bhojadeva with the commentary Tâtparyadīpikā of Śrī Kumâra	1	12	0
No. 69—ईशानशिवगुरुदेवपद्धतिः **Isanasivaguru-devapaddhati**(Tantra)by Īśânaśivagurudevamiśra Part I, Sâmânyapâda).	1	8	0
No. 70—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimula-kalpa** (Part I).	2	8	0

	RS.	AS.	P.
No. 71—**तन्त्रसमुच्चयः Tantrasamuccaya**(Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śaṅkara(Part II, 7—12 Paṭalās) (*out of stock*).	3	8	0
No. 72—**ईशानशिवगुरुदेवपद्धतिः Isanasivagurudevapaddhati** (Tantra) by Īśānaśivagurudevamiśra (Part II. Mantrapāda).	4	0	0
No. 73—**ईश्वरप्रतिपत्तिप्रकाशः Isvarapratipattiprakasa** (Vedānta) by Madhusūdanasarasvatī.	0	4	0
No. 74—**याज्ञवल्क्यस्मृतिः Yajnavalkyasmrti** with the commentary Bâlakrîḍâ of Viśvarûpâcârya (Part I — Âcâra and Vyavahâra Adhyâyās).	3	4	0
No. 75—**शिल्परत्नम् Silparatna** (Śilpa) by Śrīkumâra (Part I).	2	12	0
No. 76—**आर्यमञ्जुश्रीमूलकल्पः Aryamanjusrimulakalpa** (Part II).	3	0	0
No. 77—**ईशानशिवगुरुदेवपद्धतिः Isanasivagurudevapaddhati** (Tantra) by Īśānaśivagurudevamiśra (Part III, Kriyāpāda 1—30 Paṭalās).	3	0	0
No. 78—**आश्वलायनगृह्यसूत्रम् Asvalayanagrhyasutra** with the commentary Anāvilā of Haradattācārya.	2	6	0
No. 79—**अर्थशास्त्रम् Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Gaṇapati Śāstri (Part I, 1 & 2 Adhikaraṇās).	3	12	0
No. 80—**अर्थशास्त्रम् Do.** Do. (Part II, 3—7 Adhikaraṇās).	4	0	0
No. 81—**याज्ञवल्क्यस्मृतिः Yajnavalkyasmrti** with the commentary Bālakrīḍa of Viśvarūpācārya (Part II. Prâyaścittâdhyâya).	2	0	0
No. 82—**अर्थशास्त्रम् Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Gaṇapati Śāstri (Part III, 8—15 Adhikaraṇās).	3	4	0

	RS.	AS.	P.
No. 83—ईशानशिवगुरुदेवपद्धतिः **Isanasivaguru-devapaddhati** (Tantra) by Īśāna-śivagurudevamiśra (Part IV, Kriyā-pāda 31–64 Paṭalās and Yogapāda).	3	8	0
No. 84—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimula-kalpa** (Part III).	2	0	0
No. 85—विष्णुसंहिता **Visnusamhita** (Tantra).	2	8	0
No. 86—भरतचरितम् **Bharatacarita** (Kâvya) by Kṛṣṇakavi.	1	8	0
No. 87—सङ्गीतसमयसारः **Sangitasamayasara** (Saṅgīta) of Saṅgītâkara Pârśva-deva.	1	2	0
No. 88—काव्यप्रकाशः **Kavyaprakasa** (Alaṅkâra) of Mammaṭabhaṭṭa with the two commentaries, Sampradāyaprakāśinī of Śrī Vidyācakravartin and Sâhi-tyacûdâmaṇi of Bhaṭṭagopâla (Part I, 1–5 Ullâsās).	3	0	0
No. 89—स्फोटसिद्धिः **Sphotasiddhi** (Vyākaraṇa) by Bharatamiśra.	0	8	0
No. 90—मीमांसाश्लोकवार्त्तिकम् **Mimamsasloka-vartika** with the commentary Kāśikā of Sucaritamiśra (Part I).	2	8	0
No. 91—होराशास्त्रम् **Horasastra** of Varāhamihirā-cārya with the Vivaraṇa of Rudra.	3	0	0
No. 92—रसोपनिषत् **Rasopanisat.**	2	0	0
No. 93—वेदान्तपरिभाषा **Vedantaparibhasa** (Vedānta) of Dharmarājādhvarīndra with the commentary Prakāśika of Peddādīkṣita.	1	8	0
No. 94—बृहद्देशी **Brihaddesi** (Saṅgīta) of Mataṅgamuni.	1	8	0
No. 95—रणदीपिका **Ranadipika** (Jyotiṣa) of Kumâragaṇaka.	0	4	0

	RS.	AS.	P.
No. 96—ऋक्संहिता **Rksamhita** with the Bhāṣya of Skandasvāmin and the commentary of Veṅkaṭamādhavārya (Part I, the 1st Adhyāya in the 1st Aṣṭaka).	1	8	0
No. 97—नारदीयमनुसंहिता **Naradiyamanusamhita** (Smṛti) with the Bhāṣya of Bhavasvāmin.	2	0	0
No. 98—शिल्परत्नम् **Silparatna** (Śilpa) by Śrī-kumāra. (Part II)	2	8	0
No. 99—मीमांसाश्लोकवार्त्तिकम् **Mimamsasloka-vartika** (Mīmāṃsā) with the commentary Kāśikā of Sucaritamiśra (Part II).	2	0	0
No. 100—काव्यप्रकाशः **Kavyaprakasa** (Alaṅkāra) of Mammaṭabhaṭṭa with the two commentaries, Sampradāyaprakāśinī of Śrīvidyācakravartin and Sāhitya-cūḍāmaṇi of Bhaṭṭagopāla. (Part II, 6–10 Ullāsās).	5	0	0
No. 101—आर्यभटीयम् **Aryabhatiya** (Jyotiṣa) of Āryabhaṭācārya with the Bhāṣya of Nīlakaṇṭhasomasutvan (Part I. Gaṇitapāda).	2	8	0
No. 102—दत्तिलम् **Dattila** (Saṅgīta) of Dattila-muni.	0	4	0
No. 103—हंससन्देशः **Hamsasandesa** (Vedānta) with commentary.	0	8	0
No. 104—साम्बपञ्चाशिका **Sambapancasika** (Stuti) with commentary.	1	0	0
No. 105—निधिप्रदीपः **Nidhipradipa** of Siddha-śrikaṇṭhaśambhu.	0	4	0
No. 106—प्रक्रियासर्वस्वम् **Prakriyasarvasva** (Vyākaraṇa) of Śrī Nārāyaṇa Bhatta with commentary (Part I.)	1	0	0

	RS.	AS.	P.
No. 107—काव्यरत्नम् **Kavyaratna** (Kāvya) of Arhaddāsa	0	12	0
No. 108—बालमार्ताण्डविजयम् **Balamartanda-vijaya** (Nāṭaka) of Devarājakavi.	1	8	0
No. 109—न्यायसारः **Nyayasara** with the commentary of Vāsudevasūri.	1	8	0
No. 110—आर्यभटीयम् **Aryabhatiya** (Jyotiṣā) of Āryabhaṭācārya with the Bhāṣya of Nīlakaṇṭhasomasutvan. (Part II. Kālakriyāpāda)	1	0	0
No. 111—हृदयप्रियः **Hridayapriya** (Vaidyaka) by Parameśvara.	3	0	0
No. 112—कुचेलोपाख्यानम् अजामिलोपाख्यानं च । **Kucelopakhyana and Ajamilopakhyana** (Saṅgīta) by H. H. Svāti Śrī Rāma Varma Mahārāja.	0	4	0
No. 113—सङ्गीतकृतयः **Sangitakrtis** (Gāna) of H. H. Svāti Śrī Rāma Varma Mahārāja.	1	0	0
No. 114—साहित्यमीमांसा **Sahityamimamsa** (Alaṅkāra)	1	0	0
No. 115—ऋक्संहिता **Rksamhita** (with the Bhāṣya of Skandasvāmin and the commentary of Veṅkaṭamādhavārya) (Part II 2nd Adhyāya in the Ist Aṣṭaka.)	1	8	0
No. 116—वाक्यपदीयम् **Vakyapadiya** (Vyākaraṇa) with the commentary Prakīrṇakaprakāśa by Helarāja son of Bhūtirāja. Part I).	1	8	0
No. 117—सरस्वतीकण्ठाभरणम् **Sarasvatikanta-bharana** (Vyākaraṇa) by Bhojadeva with the commentary of Śrī Nārāyaṇa Daṇḍanātha, (Part I).	1	8	0

	RS.	AS.	P.
No. 118—**बालरामभरतम्** **Balaramabharata** (Nāṭya) by Bālarāma Varma Vañci Mahāraja.	2	8	0
No. 119—**विवेकमार्तण्डः** **Vivekamartanda** (Vedānta) of Viśvarūpadeva	0	8	0
No. 120—**शौनकीयम्** **Saunakiya** (Smṛti)	0	8	0
No. 121—**वैखानसागमः** **Vaikhanasagama** (Tantra) of Marīci.	2	0	0
No. 122—**प्रबोधचन्द्रोदयम्** **Prabodhacandrodaya** (Nāṭaka) by Kṛṣṇamiśrayati with the commentary Nāṭakābharaṇa of Śrī Govindāmṛtabhagavān.	2	6	0
No. 123—**सङ्ग्रामविजयोदयः** **Sangramavijayodaya**(Jyotiṣa).	2	0	0
No. 124—**हरमेखला** **Haramekhala** (Vaidyaka) of Māhuka with commentary (Part I. chapters 2, 3 & 4)	1	8	0
No. 125—**कोकसन्देशः** **Kokasandesa** (Kāvya) by Viṣṇutrāta.	0	8	0
No. 126—**करणपद्धतिः** **Karanapaddhati** (Jyotiṣa).	0	4	0
No. 127—**सरस्वतीकण्ठाभरणम्** **Sarasvatikantabharana** (Vyākaraṇa) by Bhojadeva with the commentary of Śrī Nārāyaṇa Daṇḍanātha. (Part II).	1	8	0
No. 128—**भृङ्गसन्देशः** **Bhrngasandesa** (Kāvya) by Vāsudeva.	0	6	0
No. 129—**हंससन्देशः** **Hamsasandesa** (Kāvya)	1	4	0
No. 130—**महानयप्रकाशः** **Mahanayaprakasa** (Vedānta) by Abhinavaguptācārya.	0	8	0
No. 131—**वृत्तवार्त्तिकम्** **Vrttavartika** (Chandas) by Rāmapāṇivāda	1	8	0

	RS.	AS.	P.
No. 132—तन्त्रोपाख्यानम् **Tantropakhyana** (Kavya)	0	6	0
No. 133—उदयवर्मचरितम् **Udayavarmacarita.**	0	4	0
No. 134—योगयाज्ञवल्क्यम् **Yogayajnavalkya**	0	4	0
No. 135—सर्वदर्शनकौमुदी **Sarvadarsanakaumudi** by Mādhavasarasvatī.	1	0	0
No. 136—हरमेखला **Haramekhala** of Māhuka with commentary (Part II Chapter 5)	0	8	0
No. 137—स्कान्दशारीरकम् **Skandasariraka** with commentary.	2	4	0
No. 138—आश्वलायनगृह्यमन्त्रव्याख्या **Asvalayana-grhyamantravyakhya** of Haradattamiśra.	2	8	0
No. 139—प्रक्रियासर्वस्वम् **Prakriyasarvasva** (Vyākaraṇa) of Śrī Nārāyaṇabhaṭṭa with the commentary of K. Sāmbaśiva Śāstrī (Part II).	0	12	0
No. 140—सरस्वतीकण्ठाभरणम् **Sarasvatikantha-bharana** (Vyākaraṇa) by Bhojadeva with the commentary of Śrī Nārāyaṇa Daṇḍanātha (Part III).	1	8	0
No. 141—सूक्तिरत्नहारः **Suktiratnahara.**	2	0	0
No. 142—वास्तुविद्या (सव्याख्या) **Vastuvidya** (Śilpa) with the commentary of K. Mahādeva Śāstrī.	1	4	0
No. 143—पाशुपतसूत्रम् **Pasupatasutra** with Pancharathabhashya of Kaundinya	2	0	0
No. 144—आग्निवेश्यगृह्यसूत्रम् **Agnivesyagrhyasutra**	2	0	0
No. 145—कुवलयावली **Kuvalayavali** (Drama) by Singabhupala.	1	8	0

Apply to:—

The Superintendent,
Government Press,
Trivandrum.